M.A. Sanskrit
Year – I
Semester – II
Paper – I

# भाषाविज्ञानं साहित्यं च
# Linguistics & Literature


## Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey
R.K.Pirakas

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**

**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संस्कृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# भाषाविज्ञानं साहित्यं च

# Linguistics & Literature

**पाठ्यपरिचयः**

पत्रमिदं भागद्वयेन विभक्तम्। भाषाविज्ञानं साहित्यं च अस्य पत्रस्य अंशविशिषः। भाषायाः मौलिकता तस्याः च आवश्यकता मानव जीवने कथं इति तस्याः महत्वं अस्मिन् पर्याये आलोचितं वर्तते। अस्याः स्वरूपम्, परिभाषा, समाजे अस्याः प्रयोगः इत्यादि विषयाः पत्रेस्मिन् पाठ्यते।

**प्रथमः खण्डः – भाषाविज्ञानस्य परिचयः, भाषायाः स्वरूपम्, भाषायाः उत्पत्तिः, भाषायाः परिवर्तनम्, तस्या कारणानि च ।**

खण्डेस्मिन् भाषाविज्ञानस्य परिचयः,अस्याः नामकरणम्, भाषाविज्ञानस्य परिभाषा, भाषाविज्ञानस्य शाखाः इत्यादि विषयाः अत्र चर्चिताः वर्तन्ते। भाषाविज्ञानम् एव भाषाशास्त्रम् इति अनयोः तत्वात्मकचिन्तनम् छात्राणाम् अवबोधनाय गम्भीरतया विचार्यते। तदनु भाषायाः परिभाषा, भाषायाः स्वरूपम्, भाषायाः उत्पत्तिः, भाषायाः परिवर्तनम्, तस्या च कारणानि अस्मिन् पर्याये आलोच्यते।

**द्वितीयः खण्डः – भाषायाः विज्ञानम् , भाषायाः वर्गीकरणम्, आकृतिमूलकवर्गीकरणम् पारिवारिकवर्गीकरणम्**

अस्मिन् खण्डे भाषायाः विज्ञानम्, तस्याः प्रमुखविभागीकरणम् छात्राणाम् बोधनाय उदाहरणेन साकं उपस्थाप्यते। तत्रापि विशेषतः आकृतिमूलकवर्गीकरणम् पारिवारिकवर्गीकणम् इति वर्गीकरणद्वयं स्पष्टरूपेण आलोच्यते। भारतीय परिवारस्य महत्वम्, तस्य शाखाः, प्रयोगरीत्या तस्य अवलोकनं गम्भीरतया प्रदर्शितम्।ध्वनिनियमानां चर्चा अत्र विहिता वर्तते।

**तृतीयः खण्डः – ध्वनिविज्ञानम्, ध्वनिपरिवर्तनस्य कारणानि, वैदिक संस्कृतम्-लौकिक संस्कृतम्, पालि-प्राकृतभाषा**

ध्वनिविज्ञानस्य परिचयप्राप्तेः परं तत्र प्रयुक्तानां नियमानां पाठः तु छात्राणां कृते दीयते। अत्रापि ध्वनिनियमेन साकं ध्वनिपरिवर्तनस्य विचारः कारणानि च अस्मिन् खण्डे क्रियते। पदविक्ज्ञानम्, वाक्यविज्ञानम्, अर्थविज्ञानम् इति भाषाविज्ञानस्य अन्यानि उपादानानि अत्र वर्णितानि। खण्डेऽस्मिन् वैदिक संस्कृतम्,लौकिक संस्कृतम्, पालि एवं प्राकृत इति भाषाभेदानां विचारः छात्रैः प्राप्यान्ते।

**चतुर्थः खण्डः – काव्यस्य काव्यशास्त्रस्य च परिचयः, रामायणस्य महत्वम्, रामायणस्य कथासारः, पात्रचित्रणम्, महाभारतस्य स्वरूपम्**

चतुर्थे खण्डे काव्यस्य काव्यशास्त्रस्य च परिचयप्रदानात् पूर्वम् आदिकाव्यस्य आलोचनं अत्र क्रियते।रामायणस्य महत्वम्, रामायणस्य रचनाकालाः, रामायणस्य कथासारः, पात्रचित्रणम्, तत्र प्रयुक्ताः रसाः, अलङ्काराश्च, एवं च तत्र विहितं काव्यसौन्दर्यं इत्यादि विशेषकथावस्तूनः चर्चा दृश्यते। अपि च महाभारतस्य स्वरूपम्, तस्य रचनाकालः, प्रबन्धयोजनादि विषयाः वर्णिताः।

**पञ्चमः खण्डः – काव्यस्य लक्षणम्, महाकाव्यस्य लक्षणम्, कविसमूहानां परिचयः**

अन्तिमखण्डे काव्यस्य लक्षणम्, तस्य च भेदाः निरूपिताः। प्रभेद् क्रमेण गद्यकाव्यस्य स्वरूपम् अस्मिन् वर्णितम् वर्तते।महाकाव्यस्य लक्षणं तेषां नामानि अत्र चर्चा क्रियते विषयवस्तुना सहितम्। संस्कृतसाहित्ये विद्यमानानां कविसमूहानां नामानि तेषां कृतिसंभारः अस्मिन् खण्डे विशिष्टक्रमेण प्रदीयते। अनेन अस्य पाठस्य परिसमाप्तिः जायते।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| प्रथमः | भाषाविज्ञानस्य परिचयः, भाषायाः स्वरूपम्, भाषायाः उत्पत्तिः, भाषायाः परिवर्तनम्, तस्या कारणानि च | 7-42 |
| द्वितीयः | भाषायाः विज्ञानम् , भाषायाः वर्गीकरणम्, आकृतिमूलकवर्गीकरणम्, पारिवारिकवर्गीकरणम् | 43-62 |
| तृतीयः | ध्वनिविज्ञानम्, ध्वनिपरिवर्तनस्य कारणानि, वैदिक संस्कृतम्- लौकिक संस्कृतम्, पालि- प्राकृतभाषा | 63-76 |
| चतुर्थः | काव्यस्य काव्यशास्त्रस्य च परिचयः, रामायणस्य महत्वम्, रामायणस्य कथासारः, पात्रचित्रणम्, महाभारतस्य स्वरूपम् | 77-88 |
| पञ्चमः | काव्यस्य लक्षणम्, महाकाव्यस्य लक्षणम्, कविसमूहानां परिचयः | 89-118 |

# खण्डः १

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- सारांशः
- बोधप्रश्नाः

## प्रस्तावना

खण्डेस्मिन् भाषाविज्ञानस्य परिचयः, अस्याः नामकरणम्, भाषाविज्ञानस्य परिभाषा, भाषाविज्ञानस्य शाखाः इत्यादि विषयाः अत्र चर्चिताः वर्तन्ते। भाषाविज्ञानम् एव भाषाशास्त्रम् इति अनयोः तात्वीकचिन्तनं छत्राणां अवबोधनाय गम्भीरतया विचार्यते। तदनु भाषायाः परिभाषा, भाषायाः स्वरूपम्, भाषायाः उत्पत्तिः, भाषायाः परिवर्तनं, तस्या च कारणानि अस्मिन् पर्याये आलोच्यते।

## उद्देश्यम्

- सरलया रीत्या छात्राणां संस्कृतभाषाज्ञानं जायते।
- भाषाविज्ञानस्य परिचयः पाठ्यन्ते।
- भाषाविज्ञानस्य शाखाः इति विषये ज्ञातुं शक्यते।
- भाषायाः स्वरूपम् किम् इति ज्ञातुं शक्यते।
- भाषायाः परिवर्तनविषये ज्ञानं जायते।

## विज्ञानम्

अर्वाचीनमते विज्ञानं नाम वस्त्वनुभवपर्यवसायि ज्ञानम् । पुरा किल भारतीयसुधानिधौ 'विशिष्टं ज्ञानं विज्ञानम्' 'विविधं ज्ञानं विज्ञानम्' 'विभेदेन ज्ञानं विज्ञानमित्यादि विविधा व्युत्पत्तयोऽस्य निरूपिताः।

तत्र 'एकं वा इदं विबभूव सर्वम्' 'एतस्मादात्मन आकाशः संभूतः' 'यतो वा इमानि भूतानि जातानि ' ' जन्माद्यस्य यतः' इति श्रुतिस्मृतिवचनस्वारस्येन विज्ञान पदमेकस्य तत्त्वस्य नानात्वमनुभावयति । ज्ञानन्तु 'सर्वं खल्विदं ब्रह्म' 'इमे लोकाः प्रजापतिः' इत्यादिवचनैर्नानात्वे एकत्वं परीक्षत इति ज्ञानविज्ञानयोर्वैलक्षण्यमवलोक्यते ।श्रीभगवद्गीतयापीदमेव गीयते-

सर्वभूतेषु येनेकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ इति ।

अपि च

तर्कोऽपि नैवोत्सहते यत्र तज्ज्ञानमर्जुन ।

प्रपंचोऽन्यत्तु विज्ञानमज्ञानं तत्र सत्यधीः ।। इति ।

भगवद्गीतायाष्टीका ज्ञानेश्वरी । अतो दर्शनशास्त्रदृष्ट्या 'बहुत्वे एकत्वम्' 'एकत्वे च नानात्व' मित्येव ज्ञानविज्ञानयोः स्वरूपं निरीक्ष्यते तत्त्वज्ञैः ।

कोशेषु विज्ञानपदम् ' मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः" इति - शिल्पशास्त्रादिकं बोधयति । शिल्पे खल्वेकमेव द्रव्यं विभिन्नरूपतां भजते; यथा सुवर्णं कटककुण्डलादिरूपेण परिणमते इति प्राग्व्याख्यातं विज्ञानपदमेव क्रमेण शिल्पशास्त्रादिषु प्रवृत्तमित्यनुमीयते ।

श्रीशंकराचार्यैरुपनिषत्सु 'विज्ञानं जीवः' प्रज्ञानं प्राज्ञो वा परमात्मेति व्याख्यातम् । तस्यापि पूर्वोक्तं तात्पर्यम् । यतः ईश्वरांशो जीवः औपाधिकभेदेन नानात्वमेव भजते । एवमेव भाषापि समयानुसारेण विभिन्नरूपतामवाप्त सा तदा कतिधेत्युपरिष्टाद् विशदं वक्ष्यते । तथा च जगति पदार्थानुभवपर्यवसायित्वमेव विज्ञानपदार्थ इति मतमाभाति ।

**विज्ञानमहिमा**

तद्धि विज्ञानं जनानां स्वाभाविकं ज्ञानं विशोधयति । तत्र च सर्वदेयं जिज्ञासा जागर्ति यज्ज्ञानविषयभूते पदार्थे किन्नाम सत्यं किश्चासत्यमिति । यतो नहि ज्ञानं सत्यात्मकमेव जगति जायते । तथाहि तच्च द्विविधम् भ्रमात्मकं प्रमात्मकञ्चेति । तत एवं प्रमाणैर्जायमानं ज्ञानं तर्केण परिशोध्यत इति न्यायभाष्यकृतोक्तम् । तद्विशोधितं स्वरूपमेव विज्ञानपदाभिलप्यतां भजते । तदित्थं विज्ञानं सत्यमेव ।

विज्ञानविशेषज्ञाश्च यं कमपि पदार्थमालोच्य किमत्रैतिहासिकं भौगोलिकं सामाजिकं धार्मिकं च तथ्यं पिहितम्, कियती चात्र शक्तिर्निहिता, ययास्माकमुपकारो भवेदिति विवरीतुं शक्नुवन्ति ।

किंच विज्ञानं नवीनं समीचीनं किमिति सर्वत्रान्विष्यति । पिहितं सत्यं सर्वथोद्घाटयति । ज्ञानमनुशास्ति । अत एव सत्यमिदं भाति 'एकेन विज्ञातेन सर्वं विज्ञातं भवतीति वचनम् । साम्प्रतं विज्ञानयुगे व्यवहारजातं विज्ञानमूलकं प्रतिभाति । अनुपदं विना विज्ञानं गमनमनुचितं विदुषाम् । न भूतो न भविष्यतीति वचनं विज्ञानप्रभावेणालीकं जातम् । मृगस्य जन्म इवासम्भवं नास्ति किमप्यधुनेति ।

भाषाविज्ञानं च किम् ?

भाषाविज्ञानस्य भाषाविज्ञानमपि विज्ञानस्यांशभूतं वरीवर्ति । विचारेण भाषाणां निदानं सुतरां ज्ञायते । यतस्तत्र भाषा कथमागता, कुत आगता, कस्माज्जाता ? किंवा सहजा, अपिवा जगतः पूर्वमासीत्, अथवा तदनन्तरं मनुष्यैर्निर्मिता, नित्या वा अनित्या वा, कथं वा परिवर्तते, कुतो विभिन्नेषु देशेषु भाषा भिद्यते । भाषायां च का प्रकृतिः कः प्रत्ययः पूर्वं व्याकृता, अव्याकृता वेति बहुविधाः प्रश्ना जायन्ते । तदुत्तरमपि भाषाविज्ञानविभिः पुरावृत्तविज्ञैः पाश्चात्त्यैर्भारतीयैर्वा यथावसरं प्रादायि दीयते च साम्प्रतमिति । एवं नहि भाषाविज्ञानेन विना भाषाणां मूलभूतं रहस्यं ज्ञातुं शक्यते । केवलं भाषार्थज्ञानं ज्ञानमेव भवति न विज्ञानमिति जानीयात् । भाषाशब्दार्थश्चानुपदं विवरिष्यते ।

संस्कृत वाङमये निरुक्तं व्याकरणं शिक्षेति वेदांगत्रये भाषावयवानां शब्दानां निर्वचनं समीचीनमुपलभ्यते । भाषाविज्ञानस्य प्राचीनन्नाम हि निरुक्तम्, निर्वचनम्, शब्दशास्त्रं वेति ज्ञायते । निरुक्तं च तावत् शब्दानां निर्वचनमेव । तत्र च प्रकृतिप्रत्ययादीनां विवेचनपुरस्सरं कथा, कथं वा तत्तदर्थेषु

शब्दानां शक्तिग्रहस्त्यागो वेति विचारः । किंचाव्युत्पन्नानामपि शब्दानां साधुत्वप्रकारः साधु प्रदर्शितो वर्तते । तच्च पंचविधम्वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम्' ।। इति ।तद्यथा

भवेद् वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् । गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम्' । इत्यादि तथा च निरुक्तं भाषाविज्ञानमेव ।

**शास्त्रवैलक्षण्यम्**

व्याकरणं केवलं नहि भाषाविज्ञानपदं लब्धुमर्हति यतो व्याकरणं वै भाषाणां सिद्धस्वरूपं बोधयति । भाषाविज्ञानन्तु तन्मूलं किमिति विचारयति । महर्षि पाणिनिना कचित् क्वचित् सूत्रेषु भाषाविज्ञानांशो निवेशितः । स तु वस्तुतः काचित्क एवांशिकः न सपरिकरः सार्वत्रिक इत्यन्यदेतत् । किं च व्याकरणं नहि सर्वथा भाषास्वरूपसंघटनाय व्याप्रियते, केवलं भाषावयवभूतानि पदानि तद् व्याकरोति । तदेतदुक्तं महाभाष्यकृता - 'नेहप्रयोग नियम आरभ्यते' किं तर्हि, संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबन्धो भवति । तद्यथा आहर पात्रम्, पात्रमाहरेति ।

साहित्ये च यद्यपि पदानां स्वारसिकं संघटनं विचन्त्यते, परं तत्रापि भाषाया उत्पत्तिः, विकृतिनिमित्तम्, विवृतिश्चैतत्सर्वं न विचारितम् । तस्माद् भाषाविज्ञानशास्त्रमन्यदेव । अपि च कस्याश्चिद् भावाया व्याकरणं भाषान्तरज्ञानं नान्तर्भावयति । भाषाविज्ञाने तु भावान्तराण्यपि ज्ञातानि भवेयुः । तथा च निरुक्तकारो यास्कः कथयति-

' तदिदं विद्यास्थानं व्याकरणस्य कास्य स्वार्थसाधकं च'' इत्येतावता स्पष्टं व्याकरणं भाषाविज्ञानमनुसरतीति जातम् ।

**भाषा-विचारः**

तत्र तत्प्रयोजनानि

भाषा हि लोकस्य सर्वश्रेष्ठनिधिरस्ति । नोनां विना जनाः किमपि चारु कर्तुं शक्नुयुः । जनानां विचाराः भाषयैव जनपदे प्रसरन्ति । अक्षिसंकोचादिभिः कंचन स्वाभिप्रायं प्रकटयन्तोऽपि मानवाः सर्वथा स्फारं न स्फारयन्ति, किंच न केवलं विद्यमानानां पुरुषाणामपितु अतिपूर्वजानां युगान्तरीयाणामपि महतां विचारधारास्माभिर्ज्ञायते, अनुत्रियते च । सोऽयं भाषाया एव महिमा । यथा प्राणिनां कृते क्षितिजलपावकगगनसमीराणामावश्यकता सर्वैः स्वीक्रियते, तथैव भाषावयवभूतानां शब्दानामपीत्यत्र न काश्चन विप्रतिपत्तयः । जगति च यावन्तो वर्तमाना व्यवहारास्ते समे भाषानुपातिन एवेति प्रत्यक्षानुभवेन सिद्धम् । अत एव हरिणोक्तम्न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते ।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते । इति ।

अपि च यदि भाषा ज्योतिर्न स्यात्तदा समग्रं भुवनत्रयमज्ञानान्धकारेण व्याप्तं भवेत् । वदति चात्र दण्डी-

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ इति ।

श्रावयति श्रुतिरप्येवमेव 'वाचेवायं ज्योतिषास्ते' अर्थाद् बृहदारण्यकोपनिषदि जनकः पृच्छति यद् 'अस्तमिते आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्ते चाग्नौ कि ज्योतिरेवायम् पुरुष इति । उत्तरयति याज्ञवल्क्यः - वागेवास्य ज्योतिभवतीति वाचैवायं ज्योतिषास्ते, पल्ययते कर्म कुरुते विपल्येतीति, तस्माद्वै सम्राट् । अपि यत्र स्वः पाणिर्न विनिर्ज्ञायते । अथ यत्र वागुच्चारयत्युपैव तत्र न्येतीत्येवमेवैतद् याज्ञवल्क्य " इति ।

अपि च वेदा अपि भाषामया एव । नैनां विना तत्सत्ता । किमधिकम् 'वागेव विश्वा भुवनानि जज्ञे' इति सर्वाधिकं भाषायाः प्रयोजनं निष्पन्नम् ।

**तत्परिभाषा**

सिद्धे च प्रयोजने भाषायाः का परिभाषेति जिज्ञासायां विश्वजनीनः परस्पराभिप्रायप्रकटन साधनीभूतः सन्निवेशविशेष निवेशितः शब्दसमूहो भाषा । अपि नाम :-

स्वाशयं स्पष्टं परेषु समनुभावयितुमारचित उपायविशेषो हि भाषा । तत्र तावज्जनैर्भाष-धातोः स्पष्टप्रवचने शक्तिर्गृहीता, भाष्यते इति व्युत्पत्या भाषाशब्दोपपत्तिश्च ।

निरुक्तादिग्रन्थनिर्माणकाले सार्वजनीना खलु भाषा लोक इति पदेनोच्यतेस्म, तदानीं वैदिकी लौकिकीति मार्गद्वयेन वाणी प्रवहतिस्म, तत्र साहित्यचर्चाचर्चितवैदिकीवाग् विख्याता । अपरा च सदा सेवनीया लौकिकी वागिति । या ग्रन्थनिबद्धा वाक् तदानीं सैव जनभाषापि समासीदिति तु कथमपि नावगम्यते । यथेदानीं दृश्यते यदेका काचिद् विशिष्टभाषा साहित्यमनुसरति । अपराश्च बहुविधाः ख्याता लोक इति । तदिदं चिरसत्यं यद् यदा कदापि यथैका साहित्यभावा भवति तदा किल स्वभावतो. जनभाषा सरस्वती नदीव नीचैर्वहति । तस्मात्तदानीमपि वेदद्वाचोऽपेक्षया काचित्सर्वजन बोध्या लोकभाषाऽऽसीत् । अत एव निरुक्तग्रन्थे 'नूनमिति विचिकित्सार्थीयो भाषायाम्' इत्युक्त्वा श्रीयास्को वाचो विभागं कृतवान् । अपि च व्याकरणमहाभाष्यादिग्रन्थेषु प्रचलिता एव शब्दा निबद्धा व्याख्याताश्च । तत्र शास्त्रे यथैको गोशब्दः सुप्रयुज्यते स्म तदा लोके प्रायस्तदनुरूपास्तदर्थवाचकाच्च नानाविधा गावी गोणी गोपोतलिकेति शब्दाः समुप लभ्यन्तेस्म । तस्मात्तदानीं या वाक साधारणजनतायां परस्परं व्यवह्रियतेस्म सैव लोकपदावगम्येति निर्णीयते । साम्प्रतं यथा महाकवेवल्मीकेर्वाचोऽपेक्षया श्रीतुलसीदासकृत रामचरितमानसीयभाषा सर्वेषां जनानां मानसमध्यास्ते । तथैव कदाचिद् वाल्मीकीयवागपि वेदवाचोऽपेक्षया सर्वजनसंवेद्याऽऽसीत् तस्माच्च सापि तदा जनभाषैवेति स्पष्टम् । एष च भाषायाः स्वाभाविकः क्रमः । तयैव प्राणिनां सर्वे व्यवहाराः संपद्यन्ते । तदित्थं परस्परं स्वाभिप्रायवोधानुकूलः शब्दसमूह एव भाषाशब्दस्य वाच्योऽर्थ इति सिद्धम् ।

वाक्कृते भाषा-शब्दस्य व्यवहारो नैव प्राचलत् । वेदेषूपनिषत्सु च तावद् वाक् शब्दस्यैव व्यवहारो दृश्यते । तथाहि ऋग्वेदे—

'तदद्य वाचः प्रथमं मंसीय येनासुरां अभिदेवा असाम' 'इति; बृहदारण्यकोपनिषदि 'कच शब्दो वागेव सा' इति । अपिच शतपथब्राह्मणे :-

'वाग्वै मनसो हसीयसी अपरिमिततरमिव हि मनः परिमिततरेव वाव इति वचनमुपलभ्यते । तथा चैवं सर्वोपनिषत्सु च भाषायै वाक शब्द एव केवलं व्यवहारविषयतामलभत । एभिर्निर्दिष्टवैदिकवचनैश्चैदमेव सुनिश्चीयते यहि वैदिकसाहित्ये भाषाशब्दस्य श्रवणमिति । यदा खलु इयं वैदिकी वाक्, इयं च संस्कारात् सर्वजन व्यवहारार्हा लौकिकी वागिति नैरुक्तिकी व्यवस्था प्रचलिता, तत एव च लौकिकभाषार्थे भाषाशब्दोऽपीत्यवगन्तव्यम् । तथाहि आचार्यप्रवरेण यास्केन 'नेति प्रतिषेधार्थीयो भाषायाम्' 'इत्युक्तम्, तदर्थस्तु 'लोके' इति तद्व्याख्यातारः ।

अयमाशयः संस्कृतभाषायां प्रतिषेधार्थीय एव नकारो गृहीतः किन्तु उभयमन्वध्यायमित्यादिना प्रतिषेधार्थीय उपमार्थीयश्चेति नकारस्यार्थस्वीकारः । तदेवं छन्दस्त्वम् भाषात्वं चेति वाचो भागद्वयं जातमिति । तदारभ्य महर्षिपाणिनिना 'प्रथमायाश्च द्विवचने भाषायाम्' इति सूत्रितम्, तदनन्तरं वार्तिककार 'प्रत्यये भाषायां नित्यमिति' वार्तिकयांचकार । तथा च तदानीं भाषायामिति शब्देन संस्कृतभाषाया एव बोधोऽभवत्, नान्यस्या भाषाया इति । निष्कर्षस्तु :—

यास्कमहर्षेः प्राङ् न कुत्रापि भाषाशब्दः प्रयुक्त उपलभ्यत इति । लोके तदा प्रचलिता बहुजनव्यवहारविषया संस्कृतवागेवासीदित्युक्तमेवास्माभिः सैव च भाषाशदमलंकुर्वती जनानां मनांसि रञ्जयतिस्म । साम्प्रतं तु हिन्दीवागेव भाषाशब्दमधिकृत्य विराजते । तथा च श्रीकवितुलसीदासेन मानसस्यादावन्ते हिन्दीवागेव साम्प्रतिकी भाषेति स्पष्टमुद्घोषितम् ।

**भाषोत्पत्तिः**

अथ भाषा कथं प्रादुर्भूतेति विचार्यते । यतो हि 'संस्कृत-भाषाविज्ञानम्' इति प्रस्तुतनिबन्धस्य यद्यपि सन्ति बहूनि शब्दार्थध्वनिनिरूपणभूतानि, भाषोपचयापचयरूपाणि चाङ्गानि तथापि 'जायते अस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति षड भावविकारा भवन्ति' इति निरुक्तोक्तवार्ष्यायणेर्वचनात् प्रथमं

जनिः, तदनु क्रमशः सत्ता, विपरिणामः, वृद्धिः, उपचयः, अदर्शनम्, इत्येवं च भावपदार्थानां प्रक्रमः स्वभावसिद्धः । तथा च भाषापि भवनात्मकेन भावेन परिलक्षितेति ज्ञात्वा कौतस्कुतः कथं वा सा जाता, किं वाय्वात्मिका, अण्वात्मिका, ज्ञानात्मिका वेति च विवेचनीयं विविधं विषयं मनसिकृत्य जायते च कथमित्यंशः पूर्वमस्माभिः परिष्क्रियते ।

" तत्तु तुच्छम् यतो भाषया विना संघीभवनमेवासंभूतम्, तत्र विचारचर्चा च कथमिति त एव जानन्तु । भवतु नाम कथमपि चेष्टादिकटाक्षैर्जनसम्मेलनम, पुनरपि अस्माभिरत्र किं विधेयम्, किमर्थं च वयं समवेता कश्चास्माकं प्रस्तावः, इत्यादि च वाचा विना कः प्रस्तावयतिस्म । तस्माद् बुद्धेः परं तदनुसन्धानमिति ।

**अन्यमतम् :-**

अन्ये चाहुः अनुकरणाद्धि भाषा प्रादुर्भूतेति । तत्र चानुकरणं तावत् पशुपक्षिणामेव, ते हि पूर्वजाः, मनुष्याश्चावरजाः, ततश्चाग्रजन्मनोऽनुकरणं स्मृतिसिद्धम् । एवं यथा काका इति जल्पन्ति वायसाः । चीची चटकाः । तथाच पुरा मानवास्तदव्यक्तान् ध्वनीन् श्रुत्वोत्सहन्तेस्म प्रयत्नांश्च चक्रुः । तत एव भाषायाः प्रभव इति केषांचन पाश्चात्त्यपण्डितानां पाण्डित्यम् ।

तत्र यद्यप्येषोऽनुकृतिपक्षः 'काक इति शब्दानुकृतिः । तदित्थं शकुनिषु बहुलम् ' ' इति आचार्यप्रवरं यास्कम्, 'अनुकरणं चानितिपरम्' "अव्यक्तानुकरणस्यात इतौ' इति सूत्रे. महर्षिं पाणिनिं च स्मारयति । तथापि भाषोत्पत्तावमूनि साधनानीति नहि भ्रमितव्यम् । यतोऽनुकरणं नाम पशुपक्षिणां मनुष्याणां च सर्वेषां भवतीति समुदं मन्ये । तदनु तेषां नामान्यपि शब्दानुकृतिमूलकानि कानि चिदिति च सहे । किन्तु ततः पूर्वं मानवा अभाषन्त एव नहि किंचित् पक्षिणश्च कूजन्तिस्मेत्यादि न बुद्धावुपारोहति ।

किंच, कथं चाव्यक्तानामनर्थकानामनुकरणशब्दानां शब्दरूपेण परिणतम्, इत्यस्य न किमप्युत्तरं लभे । तस्मादेभिर्विचारैः सन्तोषो न स्यादिति ।

**अपरमतम् :-**

अपरे च पुनः कल्पन्ते। यत् पुरा हर्षातिरेकादुद्वेगबाहुल्याद् वा मनुष्यमुखात् केचिद् ध्वनयो निःसृताः, तदनु तैरेव हर्षविस्मयादिबोधकध्वनिरूपशब्दैर्भाषोद्गमो विकासश्च जात इति । सत्यम्, पुनरपि कल्पनेयं भाषोत्पत्तिं परितो नाङ्गीकरोति तथा भूतानां शब्दानामल्पविषयत्वाद् देशभेदेन भिन्नत्वाच्च ।किंच ते शब्दाः प्रायशोऽव्यक्तध्वनिमयाः, व्यक्तशब्दनिर्माणे कथं प्रभवाः समासन्निति ।

तदित्थं कल्पना शेमुषीजुषां किल विवेचकानामत्र मतैक्यन्न लक्ष्यत । किं कर्त्तव्यम्, विषय एवैतादृशः, यत्र धिषणा शीघ्रमिदमित्थमिति विविच्य निर्धारयितुं नाप्रेसरति समीचीनमिति ।

**वाग-विभागः**

का तावद् मध्यमा वागिति यत्र स्फोट इति चेत् श्रयताम् - चतुर्धा हि वागिष्यते परा, पश्यन्ती, मध्यमा, वैखरीभेदात् । नहि केवलं वैखरीं वाचमेवावलम्ब्य भाषाया मुख्यं तत्त्वं भाषाविद्धिर्ज्ञातुं शक्यत इति ।

**परावाक**

तत्र परवाचः स्वरूप निर्धारणे सन्ति मतभेदाः । तान्त्रिकेषु तावद् 'चिच्छक्तिरेव परा वागिति अभिनवगुप्तपादाचार्या मन्वते । शैवागमद्वैतवादिनच ' बिन्दोरुच्छूनावस्थैव परा वागिति वदन्ति । केचन शान्ताम्बिकयोः शक्त्योः सामरस्यमेव परा वागिति जानन्ति । अपरे च पुनः प्रकाशरूपपीठस्योल्लासो हि नाम परा वागिति कल्पयन्ति ।

वाक्यपदीयस्यादावेव हरिश्च तामेव परां शक्तिं शब्दतत्त्वमिति पदेन जग्राहेत्युक्तमेव । अस्याः परशक्तेः शब्दतत्त्वस्य वा निर्विकल्पकसमाधावेव साधकानामनुभवः नान्येषाम् । इयं हि मूलाधारमधिशेते । तद्धि चक्रं देहमध्ये वर्तते । देहमध्यन्नाम :-

पावन्ताद् द्वयंगुलादूर्ध्वं लिंगाच्च द्वयंगुलादधः ।
मध्यमे कांगुलं यच्च देहमध्यं प्रचक्षते ॥ इति । संगीतरत्नाकरकाराः । ।

अत्रैव च ब्रह्मशक्तिः; भुजगाकारा कुण्डलिनी वा सुषुम्णाख्यं विवरमध्यास्ते । तां च योगिन उद्बोध्य ब्रह्मरन्धाख्येन चक्रेण सार्धं संयोजयन्ती त्यन्यत्र विस्तरः ।

तदित्थं परशक्तिरेव परावागिति निश्चितम् । अस्तु वा यः कोऽपि मतभेदः, वाङ्मनसातीता केवलं योगिनां निर्विकल्पकसमाधिगम्या, शब्दब्रह्मपदाभिधेया, सर्वमूलभूता, परावागित्यत्र तु न कस्यापि सन्देह इति ।

**पश्यन्तीवाक**

परशक्तेः प्रादुर्भूतो बिन्दुरेव परनादादनतिरिक्तरूपप्रकाशात्मा पश्यन्तीवागित्युच्यते । इदमत्र विज्ञेयम्-

तदैक्षत बहुस्यां प्रजाययेति श्रुतिस्वारस्येन यदा चिच्छक्तौ सिसृक्षोत्पद्यते, तदाऽसौ त्रष्टव्यपदार्थानालोचयतीति पश्यन्तीवागिति संज्ञां लभते । इयं हि वर्णक्रमाभ्यां शून्या, अविभक्तरूपा, नाभौ मणिपूरचक्रं संक्रमते । मनोगोचरीभूता च साधकानां सविकल्पकसमाधावेव । तथा चोक्तम्-

'अविभागा तु पश्यन्ती सर्वतसंहृतक्रमेति" मंजूषायां भारतवचनं नागेशभट्टेन ।

वेद्यार्थरहस्यश्लोकाच मातृकास्तुतिव्याख्यायामुपलभ्यन्ते :- तस्यां हि निर्विकारायामनादिप्रायदृष्टतः । स्वान्तः संहृतविश्वस्य सिसृक्षोत्पद्यते ततः ॥

ईक्षते सृज्यवस्तूनि नाभिचक्रमुपागता । तदेवेक्षणमाहत्य सा पश्यन्तीति गीयते ॥ इति ।

इत्थं हि व्याख्याता पश्यन्ती वागिति ।

**मध्यमावाक**

तदनु च बिन्दोरुत्पद्यमानो नाद एव मध्यमा वागिति ज्ञायते । इयं खलु ज्ञानमयी, स्थूलशब्दोपादानभूता, क्रमविशिष्टा, स्फोटपदाख्या चेति बुधैरनुभूयते, अत्र हि शब्दार्थौ विभागं गतौ । अत एव शब्देनार्थबोध इति कार्यकारणभावः फलितः । इदं च स्मरणीयं यद् यावद् बिन्दुः बिन्दुरूपेण,

अर्थादप्रसरणरूपेण स्थीयते, तावत् परनादपदेन पश्यन्तीवाग, जाते च तत्र प्रसारे विकासे वा नाद इति नाम्ना मध्यमावाङ्निर्धार्यत इति नादपरनादयोर्विभागः ।

एतस्या वाचो मध्यमात्वन्तु व्यक्ताव्यक्तरूपयोरुभयोर्वाचोरन्तरालत्वादेवेति बोध्यम् । वाचा चानया मनीषिभिर्मौनिभिः पद्यानि निर्मीयन्ते; मन्था लिख्यन्ते, प्रेमसंदेशपत्राणि च प्रेष्यन्ते, उचितमनुचितं वा कार्य निश्चीयते । जपादिकं चिन्तनं च समीचीनं संपाद्यते । किमधिकं चिन्तनेन साकं समस्ति शब्दस्य स्वाभाविकः सम्बन्धः । तत्रमध्यम वागुरूपः, चिन्तनात्मकश्च शब्दो व्यावहारिक एव स्फोट इति वक्ष्यते । इयं मध्यमावागपि, आन्तरेण कोष्ठेन वायुनाभिव्यज्यत इत्युक्तं मूंजषायाम् ।

तथा च प्रयोक्तः मध्यमवागेवान्तरेण वायुना ध्वनिरूपेण विवर्तमाना सती श्रवणपथमासाद्य श्रोतुः हृदयमनुप्रविशतिः ततश्च स्फुटतीत्यर्थावबोधचोभयत्र स्फोटात्मकशब्दादेवेति रहस्यमिदमत्र स्थाप्यते ।

यद्यपि सर्वे शब्दाः सर्वे चार्थाः बिन्दुरूपायाः पश्यन्त्या वाच एव उत्पन्त इत्युक्तं प्राक, तथा सर्वे शब्दाः सर्वार्थबोधका इत्येव प्रसज्येत, सर्वेषा कोपादानत्वेन परस्परसम्बन्धस्याव्याहतत्वात् । तथापि व्यवहारसांकर्यनिनाय पृथक् पृथक् शब्दानां पृथक् पृथगर्थैः सह संबन्धो व्यवहार निर्धहकैः शिष्टैः परिक्लृप्त इति नियतैः शब्दैर्नियतार्थबोध एव भवति ।

**वैखरीवाक**

तदनु वैखरी वाक प्रवर्तते, एषा हि वैखरी वाक् कण्ठता त्त्वाद्यभिघातजन्या, वर्णात्मिका, परश्रवणगोचरा चेति प्रत्युच्चारणमनुभूयते । इयं च कण्ठस्थितं विशुद्धाख्यं चक्रमधितिष्ठति । एतस्याः प्रादुर्भावप्रकारस्तु शिक्षासु पुराणप्रातिशाख्यादिग्रन्थेषु च बहूपलभ्यते । तत्र मध्यमवास्थितनाद एव पवनसंस्कारेणोर्ध्वमाक्रम्य मूर्द्धानमाहत्य परावृत्य च मुखमभिनिविशन् कण्ठताल्वाद्यभिघातैर्बहिर्निर्गच्छन् च वैखरीरूपतां लभते । तदुक्तं पाणिनीयशिक्षायाम्-

आत्मा बुद्ध्या समेत्यर्थान् मनो युक्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ सोदीर्णो मूभिहतो वक्रमा पद्य मारुतः । वर्णान् जनयते इत्यादि ।

अयं, आत्मा बुद्धया समेत्यार्थानिति पश्यंत्या मध्यमायाश्च व्यापारः । अतु वैखर्या उत्पत्तिप्रकारः । आत्मना प्रेरितं मनः कायाग्निमाहत्य तद् द्वारा वायुं प्रेरयन तदभिघातेन वर्णान् जनयतीति । सोऽयं संयोगजः शब्दः वैखरीवाग्रूप इति ।

वाग्रूपा देवी सर्वेषां प्राणिनां प्राणापानवाय्वोर्मध्ये अर्थाद् हृत्प्रदेशे तिष्ठति मध्यमारूपेणेति शेषः, तदेतद् व्याख्यातं प्राक् प्रयोक्तृप्राणव्यापाराभिव्यक्ता च सा कण्ठादिषु ककारादिवर्णरूपेण विवर्तमाना सती परश्रवणयोग्येति वा वैखरीति ।

**भाषायाः स्वरूपं** :-

मानवः स्वमनभावं प्रकटयितुं यत् सार्थकमौखिकं  साधनं सा भाषा। यद्यापि संकेतादि माध्यमेन स्वभावः अविव्यक्तिः कर्तुं शक्यते, तथापि सूक्ष्मस्पष्टतया च अस्माकं मनभावः अभिव्यक्तिः कर्तुं भाषा एव साधनं अस्ति । अयं भाषा वस्तुतः मानवगरीरे दिव्यः अंश वर्तते। यः केवलं मानवानां कृते अस्ति । अतः ऋग्वेदे अपि उक्तं अस्ति -

**''अहमेव स्वयमिदं वदामि जुष्टं देवेभिरूत मानुषेभिः ।**

**यः कामये तं तमुग्रं कृणेमि तं ब्राह्मणं तमृषि तं समेधाम्** ।।

अर्थात् भाषा एव सा ज्योतिः मनुष्यात् अपि ऋषेः देवतां तथा विद्वांसं च करोति ।

भाषायाः प्रवृत्तीनां ज्ञानात् पूर्वं तस्याः स्वरुपस्य ज्ञानं अनिवार्यं उपमुक्तं च भवति । भाषायाः केचन लक्षाणाः प्रवृत्तं च सन्ति, ये सामान्यतया विश्वस्य सर्वासु भाषासु प्राप्यन्ते । भाषायाः स्वरुपस्य विवेचनं विश्लेषणं च भाषाविज्ञानस्य प्रमुख उदेस्यम् अस्ति । अतः आदौ भाषायाः स्वरूपं विषये आलोचयामः ।

**<u>१)भाषा एव स्ववोंत्तम प्रकाशः :–</u>**

भाषा एव संसारस्य स्ववोंत्तम  प्रकाशः, यः मानवहृदयस्य अन्धकारः दूरीकरोति। एतत् ज्ञानज्योतिः एव विश्वे सर्वेषां मनुष्याणां कार्यकलापं प्रमाणयति । भाषा विना मनुष्याणांदुःखददशा स्यात् इति कल्पयितुं अपि न शक्यते प्रसिद्ध भाषाविदः आचार्यः भर्तृहरिः उक्तं -

**"वाग्रुरुपता चेन्निष्क्रामेदवबोधस्य शाश्वती ।**

**न प्रकाशः प्रकाशेता सा हि प्रत्यवमर्शिनी ।।"**

अर्थात भाषा एव ज्ञानं प्रकाशयति । तेन विना सविकल्पक ज्ञानं न सम्भवति । अस्मिन् प्रसङ्गे आचार्य दण्डिना उक्तं -

**"इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दिप्यते ।।"**

यदि अस्मिन संसारे शव्दरूपी प्रकाशः न प्रकाशयति तर्हि सम्पूर्णं भुवनत्रयं अज्ञानरुपी अन्धकारे आच्छादितं स्यात् ।

**२)भाषा समाजं एकत्र वध्नाति :-**

भाषायाः एव शक्तिः अस्ति यत् समग्र संसारं एकत्री कर्तुं शक्नोति। भाषा समन्वयसूत्रम् । प्रत्येकं भाषा देशीभाषिणः एकतायाः सूत्रे वध्नाति, अतः भिन्नाः सन् अपि ते एकतां अनुभवन्ति । ऋग्वेदे भाषा राष्ट्रनिर्माता संगमणी (एकीकरणं) इति च उच्यते यथा - "**अहंराष्ट्री संगमनी वसूनाम्**"।

आचार्य भर्तृहरिः अपि उक्तं-

**"शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निवन्धनी ।"**

अर्थात भाषा विश्वनिबान्धनी (जगत्संयोजयति) इति ।

**३)भाषा सर्वशक्तिसंपन्नः :-**

भाषा विश्वे महान् शक्तिसम्पनः : वस्तुः अस्ति। भाषायाः नूतनसृष्टीः निमार्णस्य सामर्थ्यः वर्तते। ऋग्वेदे भाषा वायुसमं सर्वव्यापी शक्तिरीति वर्णितं । तथाच भाषा विश्वसंरचनायाः श्रेयः दत्तं अस्ति-

<u>**अहमेव वात इव प्र वामि, आरभमाणा भुवनानि विश्वा"**</u>

<u>**४)भाषा सर्वगापकः :-**</u>

भाषायाः मानवश्य प्रत्येकं कार्यं भाषा माध्यमेन एव संचालितं भवति। सवेषु परिस्थितिषु व्यक्तिः- व्यक्ति, व्यक्तिं-समाजं, व्यक्तिः-स्वयं एव वा, भाषा मानवस्य अग्नित्यय आधारः अवति । भाषायाः आहाये मानवस्य अन्तरिक्षस्य कार्यं स्य, चिन्तन-मनन, अभिव्यक्तिस्य,व्यक्तिगतस्य,सआमआयइकस्य च कार्यंस्य कृते गृह्यते। अतः एव आचार्यभर्तुहरिणा उक्तम् -

**"इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया।"**

अर्थात भाषा सर्वेषाम् लोकिककार्याणां आधारं इति मन्यते । पुनः ज्ञानं केवलं भाषाद्वारा एवं प्राप्यते, ज्ञानं माध्यमेन एवं सर्वाणि कार्याणि भवति। अतः भवायाः अनुसरणं सर्वत्र भवति । अश्मिन प्रसने भर्तृहरिणा उक्तम् -

**"न नोऽस्ति प्रतय  लोंके यः शब्दानुगमादं ऋते अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते ॥"**

<u>**५)भाषा विराट् विश्वकर्मा च भवति:-**</u>

भाषायाः स्वभावः एतावत् विशालः अह्ः अस्ति यत् सा बह्मा इन् विशालः इति सूयते । विश्वस्य सर्वाणि भाषाः तस्मिन् निहिता: सन्ति। ज्ञान- विज्ञानयोः कोऽपि अंग नास्ति यः भाषायां न समाहिता, अतः गतप्रयब्राह्मणे 'वाग्वै विराट्' इनि उच्चचते । यजुर्वेदे वाक् विश्वकर्मा इति नामाङ्कितः अस्ति । पुनः शतपय बाह्मणे उक्तं।

**वाग्वै विश्वकर्मर्षिः । वाचा हीदं सर्व कृतम्** " !!

अर्थात् जगतः सवाणि कर्माणि बाक माध्यमेनएव सिध्यति, अतः वाक्य "विश्वकर्मा" इति कथ्यते ,तथाच भाषा सर्वम् कर्तं सामर्थ्य वर्तते ।

**६)भाषायाः प्रवाहः अविच्छिन्नः :-**

यथा मानपसृष्टेः क्रमः अविच्छिन्नतया प्रचलति, तचैव भाषायाः प्रवाहः अपि मनुष्यैः साकं अविच्छिन्न तया प्रचलति। तांडय ब्राह्मणे उक्तं -

**"सा (वाक्) ऊर्ध्वोदानतनोद यथाऽऽपां धारा संततैवम्"।**

अर्थात् नद्याः प्रवाहः यथा निरन्तरम् प्रवहति तेषां किममि व्यवधानं नास्ति , तचैव हि भाषा अपि नित्यनवीनस्रोतेन सह प्रवहति। पुनश्च ऐतरेय ब्राह्मणे उक्तं -

**वाग् वे समुद्रो न वै वाक् क्षीयते, न समुद्रः क्षीयते**

अर्थात् भाषा समुद्रः। समुद्रः यथा कदापि क्षीणः न भवति, तचैव भाषाऽपि कदापि क्षीणः न भवति । भाष समुद्र इव अनन्तमप्रमेयम् ।

**७)भाषा पारम्परिक वस्तु अस्ति :-**

भाषायाः स्वरूपं विचार्य भाषा पारस्परिकवस्तुः इति स्पष्टं भवति। भाषा मनुष्यः परम्परा माध्यमेन एव प्राप्नोति, भाषा वंश द्वारा च निरन्तरं प्रचलति। संस्कृत भाषा परम्परानुसारं सहस्त्रवर्षेभ्यः प्रचलिता अस्ति। तथैव भारते हिन्दी, मराठी, वङ्गाली, ओडिआ, गुजराती, पंन्जावी इत्यादयः भाषा परम्परागतरूपेण अनुसरणं क्रियन्ते । यदा वालः वाल्यकाले मातृभाषा शिक्ष्यते चेद् आजीवनपर्यन्तं तस्याः प्रयोगः करोति ।

अतः अस्याः भासापरम्परायाः कारणमपि ऋग्वेदे उक्तं –

**एता अर्षन्ति हृद्यात् समुद्राच्छतव्रजाः ॥**

अर्थात् भाषा "**ब्रज**", "**शनब्रज**" च उच्यते ।

**८)भाषा सामाजिक वस्तु अस्ति :-**

यथा मानवः समाजात् परिधानं, वेष, उपविष्टं खादनं पैयम इत्यादीनि मूलभूतविषयान् शिक्ष्यते तच्चैव समाजात् भाषा अपि शिक्ष्यते । प्रतिदिनं सः सहपाठिभिः साकं मिलित्वा केचन नूतनाः शब्दानां ज्ञानं प्राप्नोति । एवं तस्य ज्ञानंशब्दकोशं च वर्धते । अतः भाषा मनुष्याणां कते समाजस्य दानम् अस्ति। अतः भाषा सामाजिकवस्तुः इति मन्यते ।

**९) भाषा मनुष्याणां अक्षयसम्पदः :-**

भाषा मानवजातेः अक्षियः निधिः अस्ति ।

भाषा मानवतायाः पूंजी इति उच्यते। मानवसमाजस्य दीर्घकालीनः सञ्चितः निधिः, येन भविष्यत् मनुष्याः स्वव्यापरः चालयन्ति । मनुष्याः सृष्टेः आरभ्यात् अध पर्यान्तं यत् किमपि चिन्तितवान्, अवगतवान्, दृष्टवान् सर्वं तस्य संकलनं भाषारूपेण विद्यते । अतः छान्दोग्योपनिषदि उक्तं अस्ति -

**'पुरुषस्य वाग् रसः, वाच ऋग् रसः'**

अर्थात् भाषा मानवस्य वाग् रसः इति। पुनः ऋग्वेदे उक्तं अस्ति-

**जिह्वा देवानाममृतस्य नाभिः**

एतत् भाषा देवतानां नाभिः तथ जिह्वा इति कथ्यते।

**१०)कर्तृत्व, धर्तृत्व, हर्तृत्व च भाषा :-**

भाषायाः तिस्रः गुणाः सन्ति कर्तृत्वः, धर्तृत्वः, हर्तृत्व भेदेन। सर्वाणि सृजनात्मककार्यणस विविधाः योजनानि आर्थिक कार्यक्रमाणि अध्यापनं ज्ञानं-विज्ञानम् इत्यादयः कार्याणि भाषा माध्यम माध्यमेन एव भवति । भाषा एव समाजं धारयति संबद्धं च करोति, अन्यथा भाषायाः अभावे समाजः विघटितः स्यात्। अतः ऋग्वेदस्य वाक-सुक्ते उक्तं

**यं कामये तं तमुग्रं कृणोमि तं ब्राह्मणं तमृषि तं सुधेताम्**

अर्थात् भाषा मनुष्यात् ऋषिः विद्वानः तेजस्विनः च करोति ।

**११)भाषा सत्यासत्ययोः सूचकम् :-**

भाषायाः विशेषः अस्ति यत् सा सर्वविधानां मूर्तः-अमूर्तः वास्ताविकः - अवास्तविकः ज्ञातः – अज्ञातः निर्वचनीयः-अनिर्वचनीयः भावः-अभावः श्च प्रकटितुम् शक्यते । सूक्ष्मानिर्वचनीयम् आत्मा ईश्वरं ज्ञानं कल्पना इत्यादयस्य विषये केवलं भाषा द्वारा एव अवगम्यते।

अतः योगदर्शने पतञ्जलिमहर्षेः उक्तं –

"**शब्दज्ञानानुपाती वस्तुसून्यो विकल्पः**" ॥

**१२)भाषा पैतृकः जन्मसिद्धः श्च नास्ति:-**

भाषा मानवः जन्मना न प्राप्यते । भाषा

मनुष्यशरीरवत् जन्मसिद्धापि नास्ति I भाषा पैतृकपरम्परा रूपेण स्वतः एव न लभ्यते । भाषा शिक्षितव्याः भवति, अधिगता च भवति एकः वालः जन्मतः वाक्शक्तिः प्राप्ताः परन्तु शब्दार्थयोः सम्वधः समाजात् एव प्राप्यते । उदाहरणम् स्वरूपं - यदि वने अवशिष्टाः वालकाः किमपि वक्तुं असमर्थाः भवति । अतः भाषा पैतृक जन्मसिद्ध श्च नास्ति ।

भाषा एव ख तद् माध्यमं यस्याः माध्यमेने मनुष्यः स्वभावः विचारः च अन्येभ्यः प्रसारयन्ति। यद्यापि संकेतादि माध्यमेन स्वभावं प्रकटुतुं शक्यते परन्तु सूक्ष्मस्पष्टतया च स्वमनभावं अभिव्यक्तिः कर्तुं भाषा एव साधनं अस्ति। अतः जैमिनीयोपनिषदि उक्तं -

**तस्य (मनयः) एषा तुल्या यद् वाक् ।**

अर्थात् मनुष्याणां स्वभावं अभिव्यञ्जनस्य भाषा एव "**कुल्या**" (Channel) इति उच्यते ।

**१४)भाषा अर्जिताः सम्पत्तिः अस्ति**

मानवशरीरेण साकं भाषाऽपि जन्मना नैव आगच्छति । समाजासमाजात्त समीपस्थ पर्यावरणात् सहकारिभ्यः सहपाठिभ्यः श्च भाषा शिक्ष्यते । मनुष्यः स्वस्य व्यक्तिगतयोगितायाः प्रतिभायाः अनुसारेण बाल्यकाले भाषां प्राप्नोति ।एकः बालः प्रथमतया प्रत्येकम् शब्दः शतवारं श्रृणोति तथाच वदति ततः परं भाषा सः अवगन्तुम् अपि शक्यते । अतः संस्कृतस्य एकः सुभाषितकारः उक्तं

**क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्**

**क्षणत्याग्रात् कुतो विद्या, कण त्यागात् कुतो धनम् ।।**

अर्थात् क्षण-कणानां ग्रहणेन एव भाषाधनंञ्च सिद्ध्यति । यथा क्षण त्यागेन भाषाविद्याञ्च नैव आगच्छति। तथैव हि कण (अन्नकणान्) त्यागेन धनं नैव आगच्छति ।

**१५)भाषा अनुकरणेन व्यवहारेण च लभ्यते :-**

भाषाशिक्षणस्प्रक्रियां ध्यानेन पश्यामः चेत् एकः शिशुः समाजतः एव भाषा प्राप्नोति । ग्रा वाल्ये मातापितृभिः उक्तं वचनं अनुकरणं करोति तद् अनुकरण कृत्वा सहस्रवारं अशुद्धं अस्पष्टं च उच्चारणं करोति । शनैः शनैः शुद्धवचनं वक्तुं समर्थोऽपि भवति । एषा शिक्षणप्रक्रिया वाल्यकालात् आरभ्य जीवनशेषपर्यंतं निरन्तरं प्रचलति । अतः महर्षिपाणिनिना उक्तं-

**प्रधानप्रत्ययार्थवचनम् अर्थस्यान्यप्रमाणत्वात्**

अर्थात् लोकवहारं एव भाषा ज्ञानस्य प्रमुख साधनम् अस्ति ।

**१६)भाषा स्वभाविकात्मोद्गारं प्रक्रिया अस्ति :-**

भाषाशिक्षणं अपि द्विधाविभक्तम् (क) अनुकरणं (ख)प्रयत्नशीलश्च । मातृभाषा मुख्यतया अनुकरणेन ज्ञातुं शक्यते परन्तु अन्यभाषा मुख्यतया विदेशीयभाषाः प्रयत्नद्वारा एव ज्ञातुं शक्यते । यथा - आङ्ग्लभाषा, जर्मनभाषा, फ्रेंचभाषा, चीनीभाषा इत्यादयः । उभयप्रकारस्य भाषायाः श्रमस्य आवश्यकता भवति । मातृभाषायां न्यूनं, विदेशीयभाषासु अधिकम्। मातृभाषायां निपुणता शीघ्रं भवति, यतः बाल्यकालात् मातृभाषा स्वाभाविकात्ममुक्तित्वेन भाष्यते । अतः वक्तुं कष्टं नास्ति। एवं अभ्यासेन विदेशीयाः भाषाः अपि तथैव सहजतया लिखितुं वक्तुं च शक्यन्ते । अतः भाषा स्वभाविकात्मोद्गारं प्रक्रिया अस्ति ।

**१७)भाषा परिवर्तनशीलः अस्ति :-**

भाषा विषये उल्लेखं अस्ति यत् भाषा अनुकरणेन ज्ञातुं शक्यते। भाषा अनुकरणमिदं मौखिकरूपं अस्ति। एकः शिशुः बाल्यकालाद् प्रतेकं शब्दस्य सम्यक् उच्चारणे तस्य क्षमताःनैव आसीत् ,सः समाजतः भाषा अनुकरणं कृत्वा शब्दस्य अशुद्धं अस्पष्टं च उच्चारणं करोति। अनुकरणस्य एषा अपूर्णता प्रतिक्षणमं भाषायाः परिवर्तनं जनयति । भाषायाः आधार द्वयं उल्लिखितम् अस्ति मानसिकं शररीरिकंश्च ।क्वचिद् श्रवणे अवगमने च त्रुटिः भवति क्वचिद् भाषणेऽपि एवं रित्या भाषायाः परिवर्तनं भवति ।पारिवारिकपरम्पराद्वारा भाषा प्रचलति । आरम्भे लघुः परिवर्तनाः पश्चात् विशालं रूपं गृहीत्वा भाषायां विशेषपरिवर्तनानि आनयन्ति । एतदेव कारणं यत् वैदिकसंस्कृतात् संस्कृतं, संस्कृततः पाली > प्राकृत > अपभ्रंश > हिन्दी प्रति परिवर्तनस्य दिशा दृश्यते।

**१८) भाषायाः वाच्यरूपं प्रथमं परिवर्तते :-**

यद्यपि परिवर्तनस्य प्रक्रिया अनुकरणेन आरभ्यते तथापि परिवर्तनस्य प्रथमः प्रभावः भाषायाः वाच्यरूपे एव पतति । यदा यदा व्यक्तिगतरूपेण उच्चारणं भिन्नं भवति तदा तदा समाजस्य उच्चारणे अपि तस्य प्रतिबिम्बं परिलक्षितं शक्यते ।यथा- अग्निः > अग्गिः > आग भवति। चतुर्वेदी > चौबे, द्विवेदी > दुबे,

उपाध्याय > ओझा > झा, सत्य > सच, घृत > घृत, शर्करा > शर्करा। एवं रित्य वाच्यरूपेण भाषायाः परिवर्तनं भवति ।

**१९)भाषायाः किमपि स्थायिरूपं नास्ति :-**

भाषायाः अपि मानवजीवनसमं जीवसत्ता वर्तते। यथा मानवस्य शैशव यौवन जरा अवस्ता च आगच्छति। तथैव भाषा अपि एकजीवनं व्यतीत्य नूतनरूपं गृह्णाति। भाषाजीवने अपि शैशवः, यौवनं, जरा च भवति । वस्त्रं परिवर्तते, नूतनं जीवनं आरभ्यते। संस्कृततः हिन्दीपर्यन्तं संस्कृतस्य कियत् परिवर्तनं जातम् इति प्रत्येकः भाषाविज्ञानस्य छात्रः जानाति। भाषायां स्थिरता वा स्थिरता वा तस्याः विनाशस्य लक्षणम् । भाषायां नित्यं परिवर्तनं नवीनता च तस्याः विकासस्य गतिशीलतायाः च लक्षणम् अस्ति | अतः शिशुपालवधम् महाकाव्ये उक्तं -

**"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः"** । (शिशुपालवध ४-१७)

**२०) भाषायाः भौगोलिक सीमा वर्तते :-**

भाषायाः एक निर्धारित भौगलिक सीमा ववर्तत

यद्यापि भाषा स्थानगतत्वेन अपि भिन्नः वर्तते तथापि तस्य एक सीमा अस्ति | यथा - हिन्दि भाषायाः अन्तर्गत ब्रज, अवधी, भोजपुरी आदि भाषा आगच्छति, परन्तु बंगला, मराठी, गुजुराति इत्यादय: भाषा हिन्दिभाषातः भिन्नासन्ति । सर्वेषां स्वकीयाः भौगलिक सीमा अपि सन्ति । विहितसीमान्तरे तस्याः भाषायाः शब्दाः अपि तथैव वर्तन्ते । तस्मात् सीमां परं गत्वा भाषार्थादिभेदाः उत्पद्यन्ते । तथैव आङ्ग्ल, रूसी, चीनी इत्यादीनां निश्चिताः भौगोलिकसीमाः सन्ति । पतञ्जलिः 'सर्वे देसन्तरे' इति उक्त्वा एतत् तथ्यं सूचितवान् अस्ति ।

**"एतस्मिन् अतिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र**

**तत्र नियत-विषया दृश्यन्ते।।"**

**२१) भाषायाः अपि ऐतिहासिकसीमाः वर्तते :-**

यथा प्रत्येकभाषायाः भौगोलिकसीमाः सन्ति, तथैव तस्याः ऐतिहासिकसीमाः अपि सन्ति । ऐतिहासिकभाषाविज्ञानं प्रत्येकस्य भाषायाः एतत् ऐतिहासिकं पक्षं गृह्णाति । ऐतिहासिकभाषाविज्ञाने प्रत्येका भाषा आरम्भे केन रूपेण आसीत्, पश्चात् कथं परिवर्तनं जातम्, कस्मात् कालात् यावत् प्रचलिता अभवत्, एतानि वस्तूनि विचार्यन्ते। अस्मात् दृष्ट्या संस्कृत, पाली, प्राकृत, अपभ्रंश, आर्यभाषा इत्यादीनां कालः निर्धारितः अस्ति ।

**२२) प्रत्येकभाषायाः संरचना भिन्ना भवति :-**

विश्वस्य प्रत्येकस्य भाषायाः संरचना अथवा संरचना भिन्ना भवति । शब्दावली, व्याकरणं, उच्चारणं, शब्दरूपं, धातुरूपं, वाक्यप्रयोगः इत्यादिषु महत् अन्तरम् अस्ति। अतः प्रत्येकं भाषा स्वतन्त्रा एककं मन्यते । संस्कृते पालि-प्राकृत-अपभ्रंश इति त्रयः शब्दाः हिन्दीभाषायां च एकवचनबहुवचनमात्रम् । संस्कृते लिङ्गत्रयम् अस्ति, परन्तु हिन्दीभाषायां केवलं द्वौ लिङ्गौ स्तः – पुल्लिङ्ग स्त्री च । तथैव सर्वासु भाषासु स्वतन्त्राः नियमाः सन्ति । भाषा तेषां अनुसारं कार्यं करोति।

**२३)भाषा प्रकृत्यातः स्वतन्त्रः अस्ति :-**

भाषा प्रकृतितः एव स्वतन्त्रः अस्ति । अतः तांडय महाब्राह्मणे उक्तं -

**''अपां धारा संततैवम्'**

अर्थात भाषा जलप्रवाहः सदृशी अस्ति। यथा- पर्वतनद्याः प्रवाहस्य तीव्रतायां, आज्गतानां अपि बृहत्तशिलानां अपि भङ्गं कृत्वा प्रवर्तते तथैव हि भाषायाः प्रवाह: अखण्डः अदृशश्च भवति । अतः भाषा प्रकृतितः स्वतन्त्रः अस्ति ।

**२४)भाषायाः प्रवाहः कठिनतायाः सरलतायाः प्रति गच्छति :-**

यथा जलस्य प्रवाहः उपरितः अधः गच्छति तथा भाषा अपि कठिनतायाः सरलतायाः कृते गच्छति । सामान्यजनेषु विशेषतः बालकेषु एकः प्रवृत्तिः दृश्यते यत् ते कठिनशब्दान् सरलीकरोति । अस्य कारणं यत् मनुष्यस्य स्वाभाविकप्रवृत्तिः अस्ति यत् सः न्यूनश्रमेण अधिकं लाभं प्राप्तुम् इच्छति, अतः उपाध्यायः उपाध्यायः, हिरण्य मे हिरण्मयः, त्रि धनी त्रिचः, मुख्नो-पाध्यायः मुखर्जी इति, वन्द्योपाध्यायः इति कथ्यते बनर्जी इति लोहकारः लोहारः इति चर्मकर्मी मोची इति उच्यते। वैदिकभाषायाः व्याकरणस्य अनन्तरं यदि वयं संस्कृतव्याकरणस्य, पालीव्याकरणस्य च प्राकृतव्याकरणस्य हिन्दीव्याकरणस्य च तुलनां कुर्मः तर्हि वैदिकव्याकरणे प्राप्यमाणानां क्रियापदानां विविधता, रूपविविधता, बहुलता च क्रमेण न्यूनतां गच्छति इति ज्ञायते Has been. संस्कृतव्याकरणानन्तरं द्वन्द्वशब्दस्य नाम अन्तर्धानं जातम् । त्रिषु लिङ्गेषु नपुंसकलिङ्गस्य प्रयोगः बहिष्कृतः आसीत् । तथा च शब्दरूपे धातुरूपे विभक्तिस्थानेषु च बहु सरलीकरणम् आनीतम् । सरलतायाः सह भाषा कृत्रिमतां परित्यज्य अकृत्रिमरूपं अधिकं रोचकं मन्यते । अतः सामान्यभाषायां दीर्घसमासयुक्ताः वाक्यानि, पाण्डित्यप्रदर्शकाः प्रयोगाः च अरुचिकराः इति मन्यन्ते ।

**२५) भाषा स्थूलतः सूक्ष्मं प्रति गच्छति :-**

भाषायाः विकासे अवधानं दत्त्वा पश्यामः चेत् भाषा स्थूलतायाः सूक्ष्मतापर्यन्तं निरन्तरं गच्छति इति स्पष्टं भवति । विकासेन सह अपरिपक्वतायाः परिपक्वतापर्यन्तं गच्छति एव । भाषायाः प्रारम्भिकरूपेण सूक्ष्मगम्भीरभावनानां अभिव्यक्तिः कठिना भवति । भाषायाः विकासेन सह भाषायां साहित्यिक-दार्शनिक-वैज्ञानिक-सूक्ष्म-तत्त्वानि अभिव्यक्तुं आरभन्ते । तथा च भाषायां या अपरिपक्वता तिष्ठति सा क्रमेण प्रौढतां प्राप्नोति । शास्त्रीय-तकनीकी-शब्दकोशेषु एतादृशानां शब्दानां प्रचुरता भाषायाः परिपक्वतां सिद्धयति । धातुः, प्रकृतिः, प्रत्ययः, लोपः, विकारः, अध्याहरः इत्यादयः शब्दाः भाषायाः प्रगतिः परिपक्वतां च सूचयन्ति ।

**२६) भाषा संयोगावस्थायां वियोगावस्थां प्रति गच्छति :-**

मूलतः प्रायः विश्वस्य सर्वं भाषा संयोगवस्थायां आसीत् । भाषा प्रकृतिश्चत्ययेषु च समन्वितरूपेण स्थापितः आसीत् । परन्तु भाषायाः प्रवाहेन सह विश्लेषणप्रवृत्तिः अपि वाधिताः इति कृत्वा अन्ते भाषा वियोगावस्थां प्राप्तं । यथा- संस्कृते रामेण कार्यं करोति, रामः ओदनं पचति इत्यादयः वाक्ये प्रकृतिप्रत्ययश्च समन्वित- रुपेण अस्ति, परन्तु तस्याः वर्तमानहिन्दीभाषायां वयं विच्छेदावस्था पश्यामः चेत् रामेण इति एकशब्दस्य स्थाने राम ने" इति शब्दद्वयं तथाच कारकचिन्हे क्रियाचन्हेपि पृथक् भवति । यथा- रामाय = राम के लिए, पठति = पढ़ता है इत्यादयः। एतेन ज्ञातं भवति यत् भाषा संयोगावस्थातः वियोगावस्थां प्रति गच्छति।

**२७) भाषायाः अन्तिमरूपं नास्ति :-**

भाषायाः विषये लिखितम् अस्ति यत् सा निरन्तरं प्रवाहिता गतिशीलः च अस्ति अतः तस्याः एकं अन्तिमरूपं न भवितुम् अर्हति । जगति सर्वाणि वस्तूनि परिवर्तनशीलाः सन्ति, तथैव भाषा अपि परिवर्तनशीलाः सन्ति। नित्यं परिवर्तनशीलस्य वस्तुनः अन्तिमरूपम्। न भवति । न हि लोकस्य अन्तिमरूपं न मनुष्यशरीरस्य न च मानवभाषायाः । मृतशरीरवत् मृता भाषा अवश्यमेव अन्तिमरूपं भवितुम् अर्हति । न तु जीवितभाषायाः। यत्र जीवनं तत्र परिवर्तनं भवति; यत्र परिवर्तनं भवति तत्र विकासः भवति; यत्र विकासः भवति तत्र नित्यं नवीनता भवति। अतः भाषायाः अन्तिमरूपं न कल्पयितुं शक्यते न च तस्य विषये किमपि पूर्वानुमानं सम्भवति ।

**२८)भाषायाः सामाजिकदृष्ट्या स्तरभेदः अस्ति :-**

प्रत्येकभाषायां सामाजिकस्तरे अन्तरं भवति । समाजे प्रत्येकः व्यक्तिः समानरूपेण शिक्षितः नास्ति । शिक्षितवर्गस्य भाषायां या परिष्कारः दृश्यते सः अशिक्षितवर्गस्य भाषायां न वर्तते। अतः परिष्कृता परिष्कृता च भाषायाः रूपद्वयं उद्भवति । उभयरूपं लिखितरूपेण वाच्यरूपेण च उपलभ्यते । भाषा, लिखितरूपेण, वाच्यरूपेण च, वर्गभेदस्य, स्तरभेदस्य, शिक्षाभेदस्य इत्यादीनां आधारेण परिष्कृता

अपरिष्कृता वा भविष्यति। केवलं परिष्कृतभाषा एव साहित्ये, उच्चवर्गस्य सम्भाषणे विशेषेषु च प्रयुक्ता भविष्यति। अपरिष्कृतभाषा ग्राम्य, भ्रष्टा, दूषिता वा उच्यते । सामाजिकस्तरस्य अन्तरं विश्वस्य प्रत्येकभाषायां दृश्यते । उच्चस्तरीयभाषायां शब्दावलीप्रचुरता, व्याकरणनियमानां समुचितप्रयोगः, शब्दानां स्पष्टोच्चारणं, शैल्याः सौन्दर्यं च भविष्यति। निम्नस्तरीयभाषायां एतेषां गुणानाम् अभावः भविष्यति।

**२९)भाषा स्थिरीकरणेन प्रभावितः भवति :-** यथा मानवशरीर प्रतिक्षणं विरुद्धी प्रवृतिद्वयं कार्यं करोति तथैव हि भाषायाः अपि विरुद्ध वलद्वयं सर्वदा कार्यं करोति । यथा – (अ) **केन्द्राभिगामी (आ)केन्द्रापगामी** श्च।

**(अ) केन्द्रभिगामी :-** अयं भाषायाः अस्थिरता, परिवर्तन निवारयत्ति। पुनः केन्द्रं सदृढं करोति। अतः भाषायाः परिवर्तनगतिः स्थगिता भवति । एषा भाषायाः स्थिरीकरण अथवा मानकीकरणस्य प्रक्रिया अस्ति। एतेन सह भाषा स्वस्य परिष्कृतरूपं रक्षितुं, विनाशात् क्ष्यात् अपि स्वस्य इक्षणं कर्तुं समर्थाः भवति ।

**(आ)केन्द्रभिगामी :-** अयं भाषायाः विकेन्द्रिकरणाय महत्वं दत्वा ते भाषायां नूतनजीवनं संचारयति। तथाच भाषयां परिवर्तनं जनयति।

**(३०) भाषायाः मूलरूपं वाक्यम्, शब्दाः केवलं व्यावहारिकाः एव :-**

दार्शनिकदृष्ट्या दृष्टं चेत् भाषायाः मूलं वाक्यम् इति सिद्धं भवति । अतः पाश्चात्यभाषाविदः अपि 'वाक्यं महत्त्वपूर्णं एककं' इति निष्कर्षं प्राप्तवन्तः । वाक्यंस्य एव सा शक्तिः वर्तते यत् मनुष्याणां विचारं सम्पूर्णतया स्पष्टतया च प्रस्तुतं करोति । अतः वाक्यानां आधारः विचारः, विचाराणां आधारः वाक्यम इति उच्यते। किमपि एका भवना मनसि वचारं क्रियते चेद् सः विचारं न शब्दैः अपि तु वाक्यरूरूपेण व्यक्तं भवति । अतः वाक्यस्य सता सवर्वोच्च इति मन्यन्ते। व्यवहरिकदृष्ट्या वालानां अवगमनाय वाक्यावयवानां पदावयवानां च विषये आचार्य भर्तृहरिणा विचार्यन्ते यथा -

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।

वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ (वाक्य० १-७३)

अर्थात् पदानां अन्तर्गतं न वर्णाः न च वर्णावयवाः,तथाच वाक्ये पदानां किमपि भेदः उपस्थितिः नैव भवति ।

**भाषाया: परिवर्तनम्**

परिवर्तन तु सृष्टेः नियम:। संसारे विद्यमानानां प्रत्येकवस्तुषु परिवर्तनमस्ति । यत्र यत्र परिवर्तनं नास्ति तत्र तत्र जीवनमपि नास्ति । मानवे जीवनमस्ति तथा चेतनमपि अस्ति, अत: परिवर्तनमपि स्वभावसिद्धम् । इदमेन परिवर्तनस्य विकार: इति नामान्तर वर्तते ।यास्केन तत्कृतनिरुक्ते प्रतिपादितं यत्- प्रत्येकस्मिन्नपि

भौतिकतत्वे षडविधविकाराः भवन्तीति। ते - उत्पत्तिः, स्थिति, विकासः, वृद्धिः, क्षय: तथा विनाश: इति। एकस्य वस्तुनः अथवा विषयस्य प्रारम्भः भवति, तस्मिन सत्ता आगच्छति, तंत्र-विकास एवं परिवर्तन भवति, तस्मिन वृद्धिर्भवति वृद्धी सति क्षीणता आगच्छति अन्ते तस्य विनाशो भवति । षड्भावविकारा भवन्तीति वार्ष्यायणिः ।

जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीत । परिवर्तनस्याधारेणैव अस्य सृष्टे : जगत तथा संसार : विद्यते। गच्छतीति जगत्, य. निरन्तरगतिशीलः इति ।संसरतीति संसार:, परिवर्तनशील इत्यर्थः । इदं च परिवर्तन संसारे विद्यमानेषु प्रत्येकेष्वपि विषयेषु प्रतिदिनं दृष्टिगोचरम् अस्ति ।परिवर्तनस्य उदाहरणार्थम् - आदौ जीव: गर्भेपिण्डरूपेणागच्छति, मासान्तरे तस्मिन हस्तपादादिकस आगच्छति, ददामासादन्तरं स शिशुरूपेण मातुः गर्भात अहिरागच्छति। tre तच्च शरीरं वर्षान्तरेण तच् किञ्चित् किञ्चित परिवर्तन भूत्वा बृहद्मनुष्यो भविष्यति, तदनन्तरं पुनः तस्य क्षीण: नाशीऽपि भविष्यति। इति परिवर्तनस्य साधारणोदाहरणम् ।एवमेव भाषाया: परिवर्तनमपि भवतीति ज्ञातव्यम्।भाषाया: परिवर्तनं स्थानभेदेन कालभेदेन तथा परिस्थितिभेदेनापि भवति। एतद्भिन्नभाषयाः

अध्ययनेन ज्ञातुं शक्यते। भारतीयभाषाः सर्वा अपि एक एव मूलभाषा तः आगता, परन्तु स्थानभेदाततता.- हिन्दी, बंगला, गुजराती, मराठी, पञ्जाबी आदि विभिन्नरूपे प्रचलन्ति  अनेनैव प्रकारेण कालभेदात मूलवैदिक भाषा संस्कृतात्-> पालि→ प्राकृतम् → अपभ्रंश: हिन्दी आदि विभिन्न भाषाणामुत्पत्ति: जाता। केवलं भारतीय भाषासु एव न अपि तु प्राचीन भाषस्वपि (Western languages)

एवमेव स्थानकाल परिस्थितिभेदेन परिवर्तन भवति । आचार्यभर्तृहरिणा तस्य वाक्यपदीये प्रतिपादितम्- अवस्थादेशकालानां भेदाद भिन्नसु दशक्तिषु ।(वाक्यपदीयम्) भाषा तू स्वभावेन परिवर्तनशीला भवति । अयमेव अस्या: धर्मो भवति । अस्यैव परिवर्तनस्य विकासः अथवा विकार, इत्युच्यते। भाषाया: परिवर्तनस्य

पञ्चप्रमुख दिशा: वर्तन्ते -

१) ध्वनिपरिवर्तनम्

२) शब्दपरिवर्तनम्

३) पदपरिवर्तनम्

४) वाक्यपरिवर्तनम

५) अर्थपरिवर्तनम् - इति

ध्वनिपरिवर्तनम् ध्वने: परिवर्तनमिति ध्वनिपरिवर्तनम् ।भाषाया: मूलाधारं ध्वनिचिह्नमस्ति । भाषायां किमपि

परिवर्तन भवति चेत् तत्र प्रथमदशा तु ध्वनिपरिवर्तनमेवा' आर्यभाषासु सहस्रविधध्वनिपरिवर्तनानि जातानि ।उदाहरणार्थम् - आदिस्वरस्य लोपो भवति - अन्नाथ अनाज माज अपिधान पिधान, अभ्यन्तर- भीतर इत्यादि । एवमेव मध्यपदलोपः, स्वरलोप:, अन्त्यपदलोप:, व्यञ्जनलोपः इत्यादयो भवन्ति ।

शब्दपरिवर्तनम् –

अनेकध्वनीनां समन्वयात शब्दोत्पत्तिर्भवति । येन प्रकारेण ध्वनिषु परिवर्तनानि भवन्ति, तेनैव प्रकारेण

अत्रापि भवन्ति। मातृमाँ, पितृ→बाप; भ्रातृ-भाई इत्यादयः । दि→ दो; सत्य→ सच; घृत ⇒ घी ।

वन्द्योपाध्यायः वनर्जी, छट्टोपाध्याय: चटर्जी।

पदपरिवर्तनम् –

"सुप्तिङन्तं पदम् इति पाणिनीयसूत्रम् । सुबन्ता: तिङन्ता: पदसंज्ञकाः भवन्तीत्यस्य अर्थ : ।

प्रातिपदिकात तथा धातो:, सुप्प्रत्ययः तथा तिङप्रत्ययः क्रियते चेतु "पद्म" भवति। संस्कृतभाषायां तु प्रातिपदिकेन सह सप्प्रत्यययाणां योजनेनैव पदं भवति; एवं धातो: तिङ: योजनेनैव पदं भवति। तयो: विभजनं क्रियते चेतु पदमेव न भवति, अत: सस्कृतभाषायां पदपरिवर्तनमेव न भवति । हिन्दी-भाषायां तु कारकचिह्नाः पृथक्तया भवन्ति, अत: पदपरिवर्तन भवति । उदाहरणार्थ - राम मे फल को खाया इत्यत्र "को; ने" एती कारक चिह्नौ एतयो: परिवर्तनेन पदस्यार्थोऽपि भिद्यते। "राम को फल ने खाया" इति सम्पूर्णार्थस्य परिवर्तन भवति ।

वाक्यपरिवर्तनम् –

पदानां संयोगेन वाक्यं भवति । संस्कृतभाषायां वाक्यरचना परिष्कृतः एवं व्यवस्थितीऽपि अस्ति । अत: पदानाम् इतस्तत: परिवर्तनेऽपि अर्थे कोऽपि क्लेशो नैव भवति ।उदारहणार्थम् - कृष्ण: विद्यालयं गच्छति, विद्यालयं गच्छति कृष्णः गच्छति विद्यालय कृष्ण:, इत्यादिपदानां परिवर्तनेनाऽपि अर्थस्य भेदो नास्ति परिष्कृतस्वभावात ।परन्तु आङ्ग्लभाषायाम-' Rama killed Ravana " इत्यस्यार्थः "राम: रावणं हतवान" इति। अस्मिन्नेव वाक्ये पदपरिवर्तने सति - "Ravana killed Rama" इत्युक्तौ विपरीतार्थी भवति "रावण : रामं हतवान्" इति। इति वाक्य परिवर्तनम् ।"

अर्थपरिवर्तनम् –

अर्थपरिवर्तनद्वाराऽपि भाषापरिवर्तनदिशाया: बोधो भवति। प्रायः कोऽपि शब्दा मूलरूपे अन्यमर्थ बोधयति परन्तु कालान्तरेण तदर्थ त्यक्त्वा अन्यमर्थ बोधयति। उदाहरणार्थ-"प्रवीण:"- इत्यस्यार्थः प्रकृष्टा वीणायाम इति - रीणावादने चतुर: इति, परन्तु कालान्तरे केवलं 'चतुर:" इत्यर्थ बोधयति। एवं वेदे "मृगः"

इति दाब्दस्य पशुः इत्यर्थः, परन्तु कालान्तरे मृगशब्दः केवलं हिरणस्य बोधकीड भवत् । एवं भाषा देशकालपरिस्थिति-कारणेन परिवर्तिता भवति।

**भाषाविकृतिहेतवः**

इह सर्वे पदार्था विपरिणामिन एव सन्ति, स्थायित्वमेकरसत्वं वा न कुत्रापि कथमपि । यत् प्राक् श्रुतं दृष्टं वा न तत्तथैवेदानीं श्रूयते दृश्यते च । तत्र परिवर्तनं प्रकृतिसिद्धम् । तदुक्तं कविभवभूतिना "उत्तररामचरित" नाटकस्य द्वितीयाङ्के –

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां ।

विपर्यासं यातो धर्नात्रिरलभावः क्षितिरुहाम् ॥इत्यादिना ।

तच्च परिवर्तनं स्वाभाविकं देशकालादिप्रभावजन्यं वेति द्विविधं भवति । स्वाभाविकं यथाकालं प्रकृत्या जायते, अन्यच्च तत्तनिमित्तविशेषादेव । दृश्यते हि लोके दोहद प्रभावादपि वा तद्देशभेदाद समयेपि वृक्षेषु फलोद्गमः, लतासु पुष्पकलिकेति । न च तत्र प्रकृतिः कारणं किन्तु निमित्तकारणमेव । एवं सर्वेषु भावपदार्थेषु वीच्यते तत् । तथा च भाषायामपि परिवर्तनं निमित्तजन्यम्, स्वाभाविकं चावलोक्यत एव । अत्र च परिवर्तनानि देशकृतानि, कालकृतानि, व्यक्तिकृतानि, वर्णस्वभावकृतानि च बहुधा सम्भवन्ति ।

देशकृतं परिवर्तनम्

तत्तद्देशीय जलवायुप्रभावात् क्वचित् कोमला वर्णा नोच्चारयितुं शक्यन्ते । कचिच कठोराः । यथा आंगलाः प्रायेण तकारदकार दिस्थाने 'टकार' डकारादिकमुच्चारयन्ति । हिन्दीभाषां वदन्तोऽपि " तुम्" शब्दस्थाने "टुम्" एवं "दूबे" इत्यस्य स्थाने " डूबे" इत्येवं प्रयुज्यमाना दृश्यन्ते । कठोरवर्णोच्चारणमेव तेषां प्रकृतिसिद्धम् । तेन त्रिशब्दोच्चारणप्रसंगे 'थी' इत्येव तेषामुच्चारणं भवति । केचिच्च सुकुमार देशीया. सुकुमारप्रकृतयो वा टवर्गान महाप्राणांश्च सर्वथा वर्जयन्ति । "

तदेतदुक्तं काव्यमीमांसायाम्-

"श्रूयते हि मगधेषु शिशुनागो नाम राजा, तेन दुरुच्चारानष्टौ वर्णानपास्य स्वान्तः पुर एव प्रवर्तितो नियमः टकारादयश्चत्वारो मूर्द्धन्यातृतीय वर्जे मूष्माणस्त्रयः क्षकारश्चेति । "

श्रूयते च सूरसेनेषु कुविन्दो नाम राजा, तेन परुषसंयोगाक्षवर्जमन्तःपुर एवेति समानं पूर्वेण ।

वर्णदोषाः

" किं चैवं संस्कृते ये वर्णदोषाः परिगणिताः " संवृतः कलः, ध्मातः, एणीकृतः, अम्बूकृतः, अर्धकः, ग्रस्तः, निरस्तः, प्रगीतः, उपगीतः, विण्णः रोमश "इत्याद्यास्तेऽपि संस्कृतान्निरस्ता अपि भाषान्तरव्यवहारेषु प्रसरन्तीति तत्कृतानि परिवर्तनानि क्रमेण बहुशो जायन्ते ।

- तत्र दीर्घोच्चारणप्रसंगे सन्ध्यक्षरे ह्रस्वस्योच्चारणं संवृतत्वम् । कलः - स्थानान्तरनिष्पन्नः, "ध्मातः " -- श्वासभूयिष्ठतया ह्रस्वोपि दीर्घः, "एणीकृतः" – अविशिष्टः सन्दिग्ध एवेत्यर्थः । " अम्बू तः - " यो व्यक्तोप्यन्तर्मुख इव श्रूयते, अर्धकः - दीर्घोपि ह्रस्वः, ग्रस्तः - जिह्वामूले गृहीतः, निरस्तः - निष्ठुरः प्रगीतः - वितानेनोच्चारितः, उपगीतः - समीपवर्णान्तरगीत्यानुरक्तः, क्ष्विण्णः - कम्पमानः, रोमशः - गम्भीरः, इत्येतेषामर्थाजायन्ते । ये तावद् वर्णलोप - वर्णोपजनादयो विकृतिहेतवोऽग्रे उदाहरिष्यन्ते ते प्रायेणैतैरेव दोषैः सम्पद्यन्ते । ग्रस्तत्वदशायां क्रमेण लोपो भवति ।यथा - खलु इत्यस्य 'खो' इति, लोकशब्दस्य 'लो अ' इति 'भवति' पदस्य च होदि. होई इति वा, तथैव प्रगीतत्वादिभिर्वर्णोपजनो जायते । यथा ' मुख' शब्दस्य 'माउथ' रूपता आंगल भाषायां 'नवन्' शब्दस्य च 'नाइन' रूपतेत्यादि ।

एवं रीत्या वर्णानामपि केषां विपर्यासस्वभावोऽस्तीति सोयं भाषान्तर निमार्णे हेतुत्वमुपयाति ।

पाणिनेर्नियमस्य व्यापकत्वम्

भाषासु शब्दविपर्यासस्य केऽपि स्थिरा नियमा अद्यावधि न केनापि निरूपिताः । केवलं संस्कृतशब्द निर्माणे प्रकृतिप्रत्ययादियोगे, पदस्य पदान्तरयोगे वा ये भवन्ति विकारास्तेषां नियमाः संस्कृतव्याकरणे प्रदर्शिताः । प्राकृतशब्द निर्माणे च ये ये विकारा भवन्ति तेषां नियमाः प्राकृतव्याकरणेषु दर्शिताः परं सर्वभाषानिर्माणोपयुक्ताः साधारण नियमास्तु न कुत्रापि संगृहीता दृश्यन्ते । वस्तुतो विचार्यमाणे स्थिरनियमनिर्माणमत्र दुष्करमेव प्रतीयते । प्रकृतेर्नियमानां मनुष्येण परिच्छेदासंभवात् । '

इदन्तु दृश्यते ये नियमाः पाणिन्यादिभिः सन्ध्यादिषु प्रदर्शितास्ते व्यापकरूपेण तत्तत्सूत्रप्रदर्शितानुपाधीन् विहाय स्वातन्त्र्येणापि भाषानिर्माणे साहाय्यमादधाना दृश्यन्ते । तेन प्राकृता एव विकारा यावदुपलम्भं सूत्रकारैर्निर्दिष्टा इत्यपि सिद्ध्यति । यथा 'उदः स्थास्तम्भोः पूर्वस्य " इति सूत्रेण उद्-उपसर्गात् परः स्थाधातोः सकारो न तिष्ठतीति पाणिनिना प्रदर्शितम्, परमुदुपसर्गविरहेऽपि स्थाधातुसकारलोपो दृश्यते - " पादस्थलम् - पग्थली, वनस्थलम् - वन्नथली, स्थानम् - थाना, ठांउ इति पंजाबी भाषायाम्, पारस्थान - पथान, पठान, स्थिर-थिर, स्थाली - थाली, स्थल- थल, स्थापनाथापना, कायस्थ - कायथ, कैथ इत्यादि ।

" तथैव "झयो होऽन्यतरस्याम्" इति वर्णविशेषेभ्यः परस्य हकारस्यैव चतुर्थवर्णत्वं पाणिनिना विहितम् परं वर्णान्तरेभ्यः परस्यापि हकारस्य चतुर्थवर्णता बहुशो दृश्यते, द्वितीयवर्णत्वमपि चान्यत्रापि दृश्यते, यथा गुहागुफा, सिंह- सिंघ, इत्यादि ।

यत्तु आधुनिकैर्भाषाविज्ञानविद्भिर्हकारस्य चतुर्थवर्णरूपा, द्वितीयवर्णरूपा वा विकृतिर्नैव भवतीत्युद्घुष्यते, तत्त्वपर्यालोच्यैवेत्युदाहरणैरेभिः सुस्पष्टीभवति ।

विसर्गस्योकारत्वं च पाणिनिः उपाधिविशेष एवानुशास्ति परं संस्कृतशब्दानामन्तिमो विसर्गस्तत्तदुपाधिविरहेऽपि प्राकृतशब्देषु - ओकाररूपतां गतो बाहुल्येनोपलभ्यते । यथा-

देवः-देवो, तसः-तमो, गर्तः-गड्ढो, चन्द्रः- चन्दो, दण्डः-डंडो, चैत्रःचइत्तो, जीवः-जीओ, पारदः-पारओ (पारा), वृश्चिकः- विच्छुओ, तैलिकःतैल्लिओ, घोटकः- घोड़ओ, (घोड़ा), इति हिन्दी भाषायामित्यादि ।

एवं सन्ध्यक्षराणामेकारादीनाम् 'अय' 'अव' इत्यादिरूपता क्रमेण स्वरे पर एव च "एचोऽयवायाव : " इति पाणिनिना सूत्रिता, परं पदान्ते स्थिता नामापं सन्ध्यक्षराणां यकारवरादिरूपा विकृतिक्रमेण दृश्यते । यथा- नौ-नाव, गो- गाय, गाव इति फारसीभाषायाम् ।

एवं च संस्कृतभाषाशब्देषु ये नियमाः पाणिनिप्रभृतिभिराख्यातास्तएव व्यापकक्रमेण भाषान्तरनिर्माणप्रक्रियामपि बोधयितुमर्हन्ति विचार्य माणाः । प्राकृतव्याकरणकृतामेवंविधा नियमास्तु विचार्यमाणा भाषाविज्ञानस्य बहुतरमुपकारका भवितुमर्हन्ति ।

**उच्चारणसादृश्यम्**

अयमपि हेतुः शब्दविपर्यासे विपरिणामे वा विशेषेणोपलभ्यते । एतत् प्रभावादेव वेश-मशीत्यादीनां शब्दानां "वेष" मत्रीत्यादयः, कोशस्य कोषः, वेदप्रद्धिस्य नक्षत्रविशेषवाचकस्य "श्रोणी" शब्दस्य श्रवणरूपेण, "ऋक्थ " शब्दस्य च "रिक्थ" रूपेण विपर्यासः । किंचोच्चारणसारूप्येण वर्णानां जात्यन्तरेऽवतारो द्वेधा प्रवर्तते - उपचारदोषात् मातृकादोषाच्च । तत्रास्पष्टोच्चारणविरहाभावाच्छोतुरन्यथाग्रहो भवति, तद्यवहारपरम्परया च रूपान्तरता जायते स उपचारदोष इति प्रोच्यते । एतदुदाहरणं चोपर्युक्त "कोश- कोप" इत्यादिकमेव । "

अथ यत्र भाषान्तरशब्दो भाषान्तरे कथञ्चिदुपनीयते, तत्र यदि भाषायां तस्यां तदुपयुक्ता लिपिर्नोपलभ्यते । तदा तल्लिपिसम्बन्धात् तदुच्चारणानुवृत्त्या कालान्तरे तत्र विकारः स्वाभाविको भवति । यथा वैदिकभाषायाः शब्दाः; संस्कृतभाषामातृकयोपनिबध्यन्ते । तदुपयुक्ताश्च सर्वो लिपयो न पुनरत्रोपलभ्यन्ते । अतएव अकारस्य संवृतस्य, दुःस्पष्टान्तःस्थानां वर्णानाम्, हुंकारस्य रंगस्य, कतिपय सन्ध्यक्षराणां च संस्कृत - प्राकृतयोरुच्चार्यमाणानामपि वैदिकशब्दानां संस्कृतलिपिप्रभावाद् विपरिणामो

दृश्यते। यथा "मूढैरमूढान्" इत्यस्योष्मणो दुःस्पष्टस्य उकारस्य सोष्मरेफत्वे प्राप्ते तल्लिपेरभावाद् रेफस्यैव लिपिप्रवृत्तौ "मूरैरमूरान्" इति श्रूयते।

**अप्रसक्तिः**

अप्रसक्तिः सप्तधा भवति-प्रतिबाधात्, प्रतिक्षेपात्, रंजनात्, विक्षेपात्, अभिभवात्, आक्रमणात्, आक्षेपाच्चेति।तत्र प्रतिबाधात् स्पर्शभेदविकारो भवति, यथा दाक्षिणात्याः 'कागद' शब्दस्थाने 'कागल' इति व्यवहरन्ति । प्रतिक्षेपात्तु स्थानभेदविकारः, यथाऽत्रेवान्ये "कागज" इति व्यवहरन्ति । एवमन्येषामपि रंजन विक्षेपादीनां "स्त्री इस्त्री, स्थूल, उस्थूल" इत्यादि चोदाहरणानि प्रायः प्रोक्तान्येवेति विशेषतया ततोऽवगन्तव्यम्।

वाग्व्यवहारलाघवम्

अयं च हेतुः सर्वतोऽधिकं शब्दपरिवर्तनं प्रयोजयति, संयुक्तक्षराणि प्रायेणोच्चारणलाघवादेव परिणमन्ते । 'आदित्यवार" इत्यस्य स्थाने "इतवार" "अतवार", इति । वारिवाहक इत्यस्य स्थाने "बलाहक" इति चोपर्युक्तं वाग्व्यवहारलाघवमेव प्रयोजयति।

एवमद्यत्वेऽपि प्रथम- द्वितीयकक्षीया बालकाः किंवा युवानः "मास्टर साहब " इति प्रयोक्तव्ये "मासाहब, मास साब" इति वा सुखेन प्रयुञ्जते।तदेवं वागलाघवं भाषाविकृतिनिमिते विशिष्टं स्थानम् भजत इति।

अत्र संस्कृतभाषाशब्दानां स्वरूपनिष्पादनस्य सन्ध्यादेश्च वैज्ञानिकप्रक्रिययोपपत्तिः प्रायेण दर्शिता । एते नियमाः संस्कृताद् भाषान्तरोत्पत्तावपि बहुधा नियोजयितुं शक्यन्ते । "नामानि धातुजानीति" सर्वस्यापि शब्दस्य केनचिद्धेतुनैव प्रवृत्तिरित्येवंविधो नैरुक्तानां सिद्धान्तः प्रायेण विद्यावाचस्पतिमहाशयैर्विवृतः । तास्ता निरुक्तयः केवलं निरुक्ते प्रदर्शिताः, शब्द परिवर्तनन्तु कया परिक्रियया भवतीत्यत्र निदर्शितम्।

परिवर्तनान्येवं विधानि क्वचिदादिभूते शब्दे एव जातानीति तादृशप्राकृतपरिवर्तनं सोद्भैव शब्दप्रयोगो जातः । क्वचित्तु पूर्वं शब्दप्रयोगे पश्चादपि परिवर्तनं जातम् । क्वचिदेकविधः शब्दः प्रयुक्तः पश्चान्नाना रूपतां गत इत्यपि निदर्शनान्यत्र दर्शितानि ।

महति महति काले एवमनेकविधानि परिवर्तनानि संस्कृतभाषायां जातानीति को वा नानुमन्येत । व्याकरणनियम निबन्धनानन्तरं तु परिवर्तित शब्दानां संस्कृतभाषायां प्रवेशो वारितः । परिवर्तिताः शब्दाः भाषान्तरं जनयामासुः, तत्रापि परिवर्तनेष्वेवंविधा नियमाः समन्विताः प्रतीयन्त एव सति सूक्ष्मनिरीक्षण इति भाव्यम् । हिन्दी-भाषोत्पत्ति :-

अथ येयमद्यत्वे राष्ट्रभाषासिंहासनमधिरूढाऽस्माकं हिन्दी भाषा, तस्या अप्युत्पत्तिविषये किंचिद् विचार्यते । इयं हि संस्कृतात् प्राकृतापभ्रंशक्रमेणोत्पन्नेति प्रायेण सर्वेषां भाषातत्त्वविदां घण्टाघोषः। संस्कृतान्मागधी अर्धमागधी वा प्राकृतम्, ततोऽपभ्रंशभाषा, ततो हिन्दी भाषेति क्रमं निरूपयन्ति । तत्र हिन्दी भाषायां प्रयुज्यमानानि क्रियापदानि प्राकृत क्रमेणैव निष्पन्नानीति सत्यं प्रतीयते । यथा-

संस्कृतम् भवति प्राकृतम् भोदि, होदि होइ भविष्यति होहिइ भवतु होज्जउ अभवत् हुबी अ शोभते होहदि, सोहइ, हिन्दी ' होइ, होत, होता होइहि, होगा हो जाउ, हो जाहु, होजावो हुआ सोहत, सोहता है

शब्दादेव "सनेह" शब्दस्योत्पत्तिः सम्भाव्यते न तु "सिंह" शब्दात् । इतिहासक्रमे जाग्रत्यपि साक्षात् संस्कृतात हिन्दीभाषायां शब्दग्रहणे को हेतुरिति विचारे तु इदमेवमनुमीयते यद् भारतस्य शिक्षाभाषा संस्कृतमेवासीत्, तेन संस्कृतभाषया लोकानां सम्बन्धो दृढतर इति संस्कृतशब्दाः प्राकृताऽपेक्षया झटिति तेषां मतौ प्रतिभासन्ते । ते च पुनरपि प्रकारान्तरेणापभ्रष्टतां गच्छन्तिस्मेति । कतिचित् प्राकृतानां प्रकृत्यपेक्षया हिन्दीभाषायां प्रकृतिवैलक्षण्यमपि प्रतीयते तत एव । यथा प्राकृतेऽ नेके स्वरा व्यंजनाव्यवहिता बाहुल्येनोपलभ्यन्ते । हिन्दीभाषायां त्वल्पप्रयोगा एव ते ।किंच व्यक्तिनामान्यपि

प्राकृते परिवर्तनं गतानि यथा शकुन्तला-सउन्तला, राधा - राहा, इत्यादि । हिन्दीभाषायान्तु व्यक्तिवाचकाः शब्दाः केचि कठिना एव परिवर्तिता दृश्यन्ते यथा कृष्ण - कान्हः कान्हा, - कन्हैया, पद्मनाभ - पदुमनाभ, विष्णु - विष्नु, विसुन, शत्रुघ्न - शत्रुहन, शत्रुघन इत्यादि ।

अन्ये तु प्रायेण व्यक्तिवाचका न परिवर्तिताः । तदित्थं संस्कृतेन साक्षात् सम्बन्धोऽपि हिन्दी भाषायां बाहुल्येनोपलभ्यते ।

इदं चास्मदुं तदा विशेषेण दृढीभविष्यति यदा हिन्दीभाषायां एकस्यैव शब्दस्य द्विविधानि रूपाणि पर्यालोच्येरन्, तत्रेकं रूपं प्राकृतक्रमेणागतम् । अपरन्तु साक्षादेव संस्कृतादागतम् । यथा-

साक्षात्संस्कृतादागतम् संस्कृतम् प्राकृतक्रमेणागतम्

चक्र - चक, चका

व्याघ्र - बाघ

हृदय - हिय, हियरा

स्त्री - तिरिया

प्रिय - पिय, पिया

कर्म - काम

धर्म - घम

कार्य - काज , कारज

मार्ग – मग, मारग

दर्प – दाप, दरप

तीक्ष्ण - तीखा

आधुनिकाः हिन्दी भाषालेखकाः संस्कृतशब्दान् स्वस्वरूपेणैव प्रायेण गृह्णन्तीति तेषामुदाहरणानि नात्रोपात्तानि अपि तु हिन्दी-भाषायाः प्राचीनैः कविभिर्यानि शब्दस्वरूपाणि प्रयुक्तानि तान्येवात्र संगृहीतानि। तेन चेदं दृढभवति यत् संस्कृतभाषया जनानां दृढतर आसीत् सम्बन्धः, तत एव पुनः पुनः संस्कृतशब्दोच्चारणाय ते प्रयतन्ते स्म । पुनश्च प्रकृत्या यदपभ्रंशान्तरं सम्पन्नं तदपि हिन्दी भाषायां गृह्यतेस्म ।इत्थं रूपद्वयमपि भाषायां प्रविष्टम् ।वहञ्च संस्कृतशब्दाः तथाविधा अपि स्पष्टमुपलभ्यन्ते ये प्राकृते रूपान्तरं गताः किन्तु हिन्दी-भाषायां प्राचीनैरपि कविभिः स्वस्वरूपेणैव संगृहीताः। यथा -

संस्कृतम्    प्राकृत

उदक -   उदअ

भोजन -  भोअण

विद्या -   विज्जा

राज -   राअ

धेनु -   धेणु

नदी -   नई

औषध - औसढ

कदम्ब - कलंब, कअंब

चिकुर - चिटुर

चिह्न -   चेधं

वृन्दावन – बंदावन इत्यादि।

तेनापि हिन्दी भाषायाः संस्कृत-भात्रया साक्षात् सम्बन्धः सुदृढो भवति । ये खलु हिन्दी-भाषायामपि कवयितुं प्रवृत्ताः कवयः तेऽपि संस्कृत भापयैव शिक्षिता आसन्निति बलात् संस्कृतशब्दास्तन्मुखान्निःसरन्तिस्म । तत एव ते कचिदपभ्रंष्टान् शब्दान् प्रयुञ्जते कचिच्च मुख्यान् संस्कृतशब्दान् ।

**बोधप्रश्नाः**

1 भाषाया परिभाषा का ?

2 विज्ञानं किं ?

3 भाषाविज्ञानस्य परिभाषा का ?

4 भाषापरिवर्तनस्य कारणानि कानि ?

# खण्डः २

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- सारांशः
- बोधप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे भाषायाः विज्ञानं तस्याः प्रमुखविभागीकरणं छात्राणां बोधनाय उदाहरणेन साकम् उपस्थाप्यते। तत्रापि विशेषतः आकृतिमूलकवर्गीकरणं पारिवारिकवर्गीकरणम् इति वर्गीकरणद्वयं स्पष्टरूपेण आलोच्यते। भारतीय परिवारस्य महत्वम्, तस्य शाखाः, प्रयोगरीत्या तस्य अवलोकनं गम्भीरतया प्रदर्शितम्। ध्वनिनियमानां चर्चा अत्र विहिता वर्तते।

## उद्देश्यम्

- भाषायाः विज्ञानं तस्याः प्रमुखविभागीकरणं इति ज्ञानं भवति।
- आकृतिमूलकवर्गीकरणं किमीति ज्ञानमागच्छति।
- पारिवारिकवर्गीकरणस्य ज्ञानं ज्ञायते।
- भारतीय परिवारस्य महत्वम्षये ज्ञानं भवति।
- ध्वनिनियमानां चर्चा छत्रैः ज्ञायते ।

**भाषाया वर्गीकरणम्**

परापश्यन्ती मध्यमा वैखरीरूपेणान्तरिको वागभेदः प्राङ् निरूपितः । अस्मिन्नध्याये भाषाभेदः अर्थाद् वैखरी वाग् विभेद उपस्थाप्यते । परस्परमाशयविनिमये भाषणे चेयमेवाधिकमुपयुज्यत इति भाषापदं साक्षाल्लभते । अस्तु ! भाषाः संसारेऽस्मिन् साम्प्रतमनेकधा समुपलभ्यन्ते । एकस्मिन्नेव देशे भाषाबाहुल्यमुपलभ्यते । तत्रापि प्रान्तोपमान्तस्थानादिभेदेनैकस्या एव भाषायाविभाषोपविभाषारूपेण बहवः शाखाः संभवन्ति । तासां सर्वासां भाषाणामस्मिन् निबन्धे विवेचनमनपेक्षितम्, अप्रकृतत्वात् । अतः केवलमर्वाचीन भाषाविचारकाणां मतमाधारीकृत्य संक्षेपतस्तावत् तद् भाषावर्गव्यवस्था बिचार्यते । तत्र आकृतिमूलकं पारिवारिकं चेत्युभयथा वर्गीकरणं बोभूयते । एकत्र समान पदसन्निवेशविशेषरचनापेक्ष्यते, अपरत्र च मनुष्यगोत्रवद् भाषागोत्रम्, भाषामूलमिति यावत् ।

**आकृतिमूलकं वर्गीकरणम्**

तत्र समानपदसन्निवेशविशेषरचमाद्वारा भाषाः वर्गद्वये विभज्यन्ते । तत्र काचिदयोगात्मिकाः, अन्याच योगात्मिका इति । अयोगात्मिकासु भाषासु तावदिदं दृश्यते यत् सर्वे शब्दाः सर्वत्र स्वार्थबोधने स्वतन्त्रा भवन्ति । नहि शब्दान्तरसन्निवेशे वाक्यस्थः कश्चिच्छन्दो जात्वपि विकृतिं लभते । क्रियासंज्ञादिशब्दानां परिचयो वाक्य एव भवति नान्यत्र । किं चेदमपि दृश्यते यदेक एव शब्दः कदाचित् संज्ञारूपेण कदाचिच्च क्रियारूपेणाप्यवतिष्ठते । अत्र चीनी, तिब्बतीप्रभृतयो भाषा एव समायान्ति । तथाहि चीनीभाषायाः 'न्गोतानी' इत्येकं वाक्यमस्ति । एतदर्थस्तु क्रमशः संस्कृतवाचि 'अहं हन्मि त्वाम्' इति भवति । इदमेव वाक्यं यदि व्यत्ययेन 'नीतान्गो' रूपेण पठ्यते तदा 'त्वं मां हंसि' इत्यर्थोऽपि तेभ्य एव परिगणितशब्देभ्योऽवगम्यते । न च प्रत्ययः नवा काचिद्विभक्तिरत्रार्थान्तरे दृश्यते । सर्वे शब्दा यथापूर्वं सन्ति, केवलं व्यत्यासमात्रम् ।तथा च नहि विभक्तिप्रत्ययादीनां योगः सम्बन्ध इत्ययोगात्मकभाषावर्गः कथितः ।

योगात्मकभाषावर्गे सामान्यतः समासप्रधानाः प्रत्ययप्रधाना विभक्तिप्रधाना इति त्रिधा भाषाः संमिलन्ति, तत्र समासप्रधाना भाषा अतीव संश्लिष्टाः संलक्ष्यन्ते। तद्वाक्येभ्यः पदानां पृथककरणं दुःसाध्यं भवति। अत्राधिक्येन अमेरिकाख्यदेशस्य सर्वा भाषा अन्तर्भवन्ति। उदाहरणार्थमेकं वाक्यमत्र प्रस्तूयते - 'नाघोलिनिन् ' इति। एतदर्थो हि 'अस्माकं कृते नावमानय' इति। डा० बाबूराम सक्सेनामहाशयानां विवेचनानुसारेणात्र पदविभागस्तु "नतेन्", "आमोखोल" "निन्"" इत्येवं भवति। क्रमशः "नतेन्" इत्यस्यानयनमर्थः " आमोखोल" वाचकश्च नौशब्दः "निन् " इत्यस्यास्माकं नः अर्थ इति।तदेवं समासप्रधानभाषावर्गो विवेचितः।

प्रत्ययप्रधानभूतभाषा अश्लिष्टा भवन्ति। अत्र प्रकृतिप्रत्ययभागः सदा प्रत्यक्षरूपेणैव विराजते। एतद्वर्गान्तर्भूताः तुर्की - द्राविडप्रभृतिभाषा विद्यन्ते। तत्र तुर्कीभाषाया गृहवाचकः 'एव' शब्द एवोपर्युक्तमर्थं प्रमाणयति। तथाहि बहुत्ववाचकात् "लेर" प्रत्ययसंसर्गात् " एवलेर" इति दशायां गृहबाहुल्यं ब्रवीति। पुनचं "इम" प्रत्ययसन्निवेशात् " एवलेरिम" इत्येवंभूतः शब्दो 'मम गृहा' इत्येतदर्थं ददाति। एतत्सर्वं च प्रत्ययप्रत्यक्षदशायामेव भवति न तु प्रत्ययाप्रत्यक्षदशायामिति। तदेवंघटकीभूतभाषाः प्रत्ययप्रधानवर्ग एव निपतन्ति।

विभक्तिप्रधानाः खलु भाषाः श्लिष्टाः संजायन्ते। प्रकृतिप्रत्यययोः पूर्णतः समाहार एवैतद्वैलक्षण्यमालक्ष्यते। नहि प्रत्ययप्रधानभाषावद् विभक्तिरूपप्रत्ययानां सर्वतः पृथगदर्शनमत्र। संस्कृतभाषा, "अरबी" प्रभृतयो वा भाषा एतद्वर्गे संगच्छन्ते। संस्कृते कुत्रचित् प्रत्यया एव प्रकृतिमाचामन्ति, यथा "अधुना" 'इयान्' इत्यादौ प्रकृतयश्च प्रायः सर्वत्र प्रत्ययान् क्रोडीकुर्वन्ति, नहि " नमः शिवाय" इत्यत्रोपर्युक्त " एवलेर" शब्दवत् प्रत्ययः स्पष्टं संलक्ष्यते।एवम् अरबीभाषाया लेखनार्थक "क्तूब" धातोः केवलं स्वरसंसर्गात् "किताब" "कुतुब्" "कातिव" इत्येवंविधाः शब्दा निष्पाद्यन्ते।तदेवं विभक्तिप्रधानभाषावर्गो व्याख्यातः।

"अत्रान्तर्मुख बहिर्मुख-विभक्तिप्राधान्यमिति भेदं कृत्वा" सेमेटिकादिपरिवारस्य भाषा अन्तर्मुखविभक्तिप्रधानभाषावर्गे समायान्ति । "भारोपीय" परिवारस्य च बहिर्मुखविभक्तिप्रधानभाषा भवन्तीति विविनक्ति । पारिवारिकवर्गे चानुपदमेतत् पारिभाषिकं नामरहस्यमुद्घा टयिष्यते ।
तदित्थं संक्षेपेणाऽऽकृतिमूलकं वर्गीकरणं विवेचितम् ।

**पारिवारिकं वर्गीकरणम्**

अथ पारिवारिकवर्गीकरणस्यापि परिचयो यथा संक्षेपमिह दीयते । तत्र समुपलभ्यमान समस्तभाषाणां कानिचिदेवादिस्रोतांसि सन्तीति तैः साकं तासां सम्बन्धः स्थाप्यते । सम्बन्धस्थापने तच्छब्दार्थसारूप्यं यथा संभूतं स्थानसामीप्यमपेक्ष्यते । यथा च यत्र यासां भाषाणामेवंभूतः सम्बन्धो जागरूको दृश्यते तत्र तासां मूल एकैव भाषा, तत एव समयानुसारेण विभिन्नभाषाः समुद्पद्यन्त इति विचार्य परिवारद्वारा भाषा विभज्यन्ते । तत्र भाषासारूप्यमहिम्ना जगतश्चत्वार्येव खण्डानि भवन्ति । तत्रैकम् अमेरिकाखण्डम्, द्वितीयं प्रशान्त महासागरखण्डम् तृतीयम् अफ्रीकाखण्डम्, तुरीयं च यूरोप - एशियाखण्डम् एतत् प्रचलितन्नामोच्चारणलाघवाद् "यूरेशिया" खण्डमिति । एषु चतुर्षु खण्डेषु सापेक्ष्यशब्दार्थसारूप्यमपेक्ष्या नेकविधोऽ वान्तरपरिवारः परिकल्प्यते । तत्रापि पूर्वोक्तभावोपभाषास्थानीयभाषाभेदेन बहवो भेदाः क्रियन्ते । तत्रोक्तामेरिकादिखण्डत्रयपरिवाराणां विवेचनमत्र केवलं निबन्धपरिवर्धनं प्रयोजयिष्यतीत्युपेक्ष्योदाहरणायैकं यूरेशियाखण्डमेव संगृह्यते । इदं हि खण्डं सर्वतः परिपूर्णम् । प्राचीनतमं वाङ्मयस्वरूपं च सुरक्षितं समुपलभ्यतेऽस्मिन्नेव खण्डे । विपश्चितां भाषाविषयकमनुसन्धानं सर्वतः प्रथममत्रैव जातम् । तत् प्रमुखपरिवारास्तु " यूराल - अल्ताई" चीनी, द्राविड, काकेशस, सेमेटिक, भारोपीय- नाम्ना सुप्रसिद्धाः । तत्र "यूराल अल्ताई" वर्गस्य प्रत्ययप्रधानभाषा भवन्तीति तुर्की भाषायाः "एवलेर" प्रभृतयः शब्दा एव प्रमाणमिति प्रागुपात्तम् । "चीनीवर्गस्य" द्वितीयं नाम "एकाक्षरवर्ग" इति । अत्र "अनामी" ' स्यामी" तिब्बती, चीनी, प्रभृतयो भाषा

अन्विताः सन्ति । एतद्वैशिष्ट्यमपि "गोतानी" इत्युदाहरणद्वारा परिलक्षितं पूर्वम् । नह्येतद् वर्गीयशब्दा अर्थप्रत्यायनाय प्रत्ययकुलं गच्छन्ति, अपितु मूलभूतैकाक्षरशब्देन स्वार्थान् जनयन्ति । अतएव " एकाक्षरवर्ग " इति नामापि जातमिति ज्ञायते ।

" द्राविडवर्गस्य" च निखिला भाषा भारतस्य दक्षिणभागमध्यासते । एतद्वंशीयाः प्रायः प्रत्ययप्रधानभाषाः संजायन्ते । विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमं नाङ्गीकुर्वन्तीमाः । अनेकाक्षरात्मकशब्दप्राधान्यमत्रेति ।

पूर्वोत्तर प्रत्ययप्राधान्यमावहन्ति किल "काकेशस" - कुलस्य भाषाः, अतश्च संयोगप्रधानाः । अस्मिन् कुले स्थानीयभाषाः ("बोली" इति हिन्दी भाषायां ) बहु विद्यन्त इति ।

'सेमेटिक' सामी वेति वर्गान्तर्भूतभाषा अरबी प्रभृतयः सन्ति । वक्ष्यमाणभारोपीयवर्गेण साकमस्य कुलस्य सम्बन्धः स्थाप्यते । वर्गयस्यैतस्याशेषा भाषा एकस्या एवादिभाषातो जनिमलभन्तेति । पुनरपि 'स्वामीवर्गे अक्षात्रयात्मकधातूनां प्रचारः, भारोपीय कुले च न तथा । शायस्तत्रैकाक्षरात्मकधातवः समुपलभ्यन्ते । एवमन्तविभक्तिप्राधान्यं चोभयत्रभेदप्रतीतिमवगमयति । तदुक्तं प्राक् " त्तव" धातो: "किताब" कुतुब इत्यादि शब्दनिष्पत्तिस्वरूपेण ।तदेवं वर्गद्वयव्यवस्था स्थापनं युक्तमिव भातीति भारत-यूरोपीय-बोधको भारोपीय-शब्दः । एतद्वर्गीयभाषाः परस्परं विशेषेण साम्यं दधति । सर्वत्र प्रत्ययाः परत्वेनोपयुज्यन्ते । एक एव शब्दोऽर्थवशादत्र प्रत्ययकुलं गत्वा विभिन्नरूपेणावतरति । यथा रामशब्दः प्रत्ययप्रभावादेव ' रामः रामौ रामाः' इत्येवंभूतानि नानारूपाणि धारयति ।

किंचैतद्वर्गविशिष्टभाषाः संश्लिष्टाः प्राक् क्रमेणाश्लिष्टा भवन्तीत्युच्यते । ततु "बाग्वै पराच्य व्याकृतावदत्" इति श्रुत्या प्रतिपादितमस्माभिः प्रागेव । वर्गश्चाग्रं वर्णविशेषाद् द्विधा विभज्यते । तत्र " शतम्" वर्गः प्रथमः, "केन्दुम् " वर्गश्च द्वितीयः । प्रथमवर्गे ता एव भाषा आनीयन्ते यत्र

शतसंख्यावाचकशब्दे शकार ( सकार) ध्वनिः श्रूयते । एवं केन्टुम्वर्गे ककारध्वनिः कवर्गध्वनिर्वेति । तथा च "आर्येरानी" प्रभृतयो भाषाः शतम्-वर्गे, यवनानीजर्मनी - प्रभृतयश्च केन्दुम् - वर्गे संभान्ति । तदित्थम् अर्वाचीन भाषाविवेचकानां मतमवलम्ब्य भाषाणां वर्गीकरणं विचारितम् ।एवमन्येऽपि बहव उपायाः कल्पिताः सन्ति । ते चेह नोपन्यस्यन्ते, एतन्निबन्धीयविषयत्वाभावात् । "संस्कृत-भाषाविज्ञानम्" इति निबन्धनाम, नहि संस्कृतवाङ्मये एवंभूतं वर्गीकरणं कुत्रापि समपलभ्यते ।

**विभिन्न भारत-यूरोपीय कुलनाम**

काले काले भारत-यूरोपीय-परिवारस्य विविधानि नामानि सुच्यन्ते । एतेषु चत्वारि मताः विशेषतया उल्लेखनीयाः सन्ति--

१. इन्डो-जर्मनी अथवा इन्डो-जर्मनी परिवार –

जर्मन-विद्वांसः प्रथमतया भाषाविज्ञानस्य क्षेत्रे प्रशंसनीयं कार्यं कृतवन्तः । एकस्मिन् अन्तरे भारतीयभाषाः अपरस्मिन् अन्तरे जर्मनभाषाः च गृहीत्वा सः एतत् नाम प्रस्तुतवान् । अद्यापि जर्मन-विद्वांसः इन्डो-यूरोपीय-परिवारम् अनेन नाम्ना सम्बोधयन्ति । अस्मिन् नाम्ने एकः अन्तरालदोषः अस्ति (क) जर्मनीदेशस्य पश्चिमदिशि स्थितः सेल्टिककुटुम्बः अस्ति, एतत् गम्यते। (ख) जर्मनीदेशस्य दक्षिणे इटालिकं वा रोमान्सपरिवारं (फ्रेञ्च्, इटालियन्, स्पैनिश, पुर्तगाली इत्यादयः) बहिः त्यक्तः अस्ति। अतः एतत् नाम आङ्ग्लभाषाशास्त्रज्ञैः इत्यादिभिः न स्वीकृतम् । राजनैतिकदृष्ट्या आङ्ग्लाः जर्मनीदेशस्य शत्रवः आसन् अतः ते एतत् नाम न स्वीकृतवन्तः ।

२. आर्यकुल-

अस्य कुलस्य मूलवक्तारः 'आर्यः' आसन्, अतः एतत् नाम प्रस्तुतम् । एतत् नाम अपि न स्वीकृतम् आसीत् । तस्य कारणद्वयं आसीत् (१) २.न सर्वे भाषाभाषिणः आर्याः सन्ति । (२)

'आर्यपरिवार' इति पदं भारत-ईरानी-परिवारस्य कृते अधिकं लोकप्रियम् अस्ति । अनेन भ्रमः सम्भवति ।

३. इन्डो-यूरोपीय परिवार –

इदम् इण्डो-यूरोपीय परिवार इति अपि कथ्यते । एतत् नाम प्रथमं फ्रांसीसीविद्वांसः दत्तवन्तः । एतेन भारतात् यूरोपपर्यन्तं प्रसृतायाः भाषायाः भौगोलिकप्रसारस्य विचारः प्राप्यते । अस्मिन् नाम्नि अपि अतिव्याप्तिदोषाः, अतिव्याप्तिदोषाः च सन्ति (क) एताः भाषाः सम्पूर्णे भारते यूरोपे च न भाष्यन्ते। द्रविडपरिवारः दक्षिणभारते अस्ति । यूरोपे बास्क्, काकेशी, उराल्-अल्ताइ इत्यादयः परिवाराः भारत-यूरोपीय-जनानाम् अपेक्षया भिन्नाः सन्ति । (ख) अमेरिका, आस्ट्रेलिया, दक्षिण आफ्रिका इत्यादिषु आङ्ग्लभाषा, फ्रेंचभाषा इत्यादयः अपि भाष्यन्ते। एवं आच्छादन-अतिव्याप्तिदोषाः सन्ति । वस्तुतः निर्दोषं नाम किमपि न लभ्यते । एतत् नाम अतीव लोकप्रियं जातम् अतः एतत् नाम स्वीकृतम् अस्ति ।

४. इन्डो-हित्ती परिवारः –

१८६३ तमे वर्षे ह्युगो विङ्क्लर् इत्यनेन बोगाज्कोइ-नगरस्य एकस्मिन् स्थाने क्यूनीफॉर्म-शिलालेखाः प्राप्ताः । तेषां अध्ययनेन हित्तीभाषा अथवा हित्तीभाषा आविष्कृता । प्रो. अस्य आधारेण अस्य कुटुम्बस्य नाम 'भारत-हित्ती' इति अभवत् । इदमपि नाम न स्वीकृतम्। अस्य दोषाः सन्ति (१) भाषायाः विस्तारं प्रसारं च न प्रकाशयति । (२) हित्तीजातेः नाम अस्ति । भारतस्य अर्थः देशः, हित्ती अर्थः जातिः । उभयोः संयोगः असङ्गतः । (३) अस्मिन् नाम्नि द्विविधता वर्तते।

लोकप्रियतायाः आधारेण इन्डो-यूरोपीयनामानि श्रेष्ठानि इति मन्यन्ते ।इन्डो-यूरोपीय-परिवारस्य शाखाः Indo-European इति शब्दः भारत + यूरोपीयस्य लघुरूपम् अस्ति एषः

भारत-यूरोपीयभाषायाः अनुवादः अस्ति । इन्डो-यूरोपीयभाषायां भारतात् यूरोपपर्यन्तं विस्तृतानां भाषासङ्ग्रहः अन्तर्भवति । अस्य कुलस्य दश शाखाः सन्ति-

भारोपीय परीवारे, ईरानी-भारती द्वयी ।

बाल्टो-स्लाविकी चैव, आर्मीनी ग्रीक केल्टिकी ॥१॥

जर्मानिकी च तोखारी, हित्तीअल्बानिकी तथा ।

इटालिकी' च दशमी, शाखाश्चैताःप्रकीर्तिताः ॥ २॥ (कपिलस्य...)

१. भारत-ईरानी (आर्य) (क)भारतीय, (ख) ईरानी

२. बाल्टो-स्लाविक (क) बाल्टिक (ख) स्लाविक

३. आर्मीनी

४.अल्बानी (इलीरी)

५. ग्रीक (हेलेनिक)

६. केल्टिक

७. जर्मानिक (ट्यूटानिक)

८. इटालिक

९.हिटाइट (हित्ती)

१०. तोखारी

### (क) केन्टुम् च शतम् (सतम्) वर्ग

भारत-यूरोपीय-परिवारस्य भाषाः ध्वनि-आधारेण द्विधा विभक्ताः सन्ति (क) केन्टुम्, (ख) सतम् । अस्य विभागस्य श्रेयः प्रो. अस्कोली १८७० तमे वर्षे सः एतत् मतं प्रस्तुतवान् यत् मूलभारतीय-यूरोपीयभाषायाः कण्ठस्य (स्वरयंत्र-तालु) ध्वनयः केषुचित् भाषासु कण्ठरूपेण एव तिष्ठन्ति, केषुचित्

भाषासु च ते सिबिलन्ट् (sibilant, ऊष्म श ,स, ष) अभवन् एतत् स्पष्टीकर्तुं लैटिनभाषा, अवेस्ता च इति प्रतिनिधिभाषाद्वयं गृहीतम् । यथा - १०० इति संख्याशब्दः गृहीतः । शतं ल्याटिनभाषायां सेण्टम्, अवेस्ताभाषायां 'सतम', संस्कृतभाषायां 'शतम्' इति । सर्वाणि इन्डो-यूरोपीयभाषाः एतयोः भागयोः विभक्ताः आसन् । उपर्युक्तेषु १० परिवारेषु प्रथमचतुर्परिवाराः 'शतम्'-वर्गे, शेषषट्-परिवाराः 'केण्डुम्'-वर्गे पतन्ति । अवेष्टस्य 'सतम्' इत्यस्य स्थाने 'शतम्' इति संस्कृतशब्दस्य प्रयोगः युक्तः ।

'शत' इत्यस्य मूलभारतीय-यूरोपीयभाषायाः शब्दः Kmtom (क्मतोम्) इति मन्यते । विभिन्नभाषासु अस्य विकासः यथा भवति इति मन्यते ।

मूल भारोपीय शब्द: (क्मतोम् = शतम्)

शतम् (सतम्) वर्ग

^

संस्कृत-शतम्

अवेस्ता सतम्

फारसी सद्

हिन्दी सौ

रूसी स्तो

लिथुआनियन स्जिम्तास

केन्दुम् वर्ग

^

लैटिन केन्दुम् (Centum)

ग्रीक हेकटोन (Hekaton)

केल्टिक (आयरिश) केत् (Cet)

तोखारी - कन्ध

गायिका - हुन्ड

जर्मन हुन्डर्ट (Hundert)

फ्रेंचसं - सं( सेंट, Cent)

इटालियन - केन्तो

प्रारम्भे केन्टम्-समूहस्य भाषाः पश्चिमे प्रचलिताः सन्ति, पूर्वे च शतम-समूहस्य भाषाः प्रचलिताः इति विचारः प्रस्तुतः । प्रो.हर्ट् इत्यनेन विश्चुला नद्याः पश्चिमदिशि केण्टुम् वर्गः, पूर्वदिशि शतमवर्गः च विचारितः आसीत् । पश्चात् यदा तोखारी-हित्ती-भाषा च मिलितवन्तौ तदा एषः सिद्धान्तः अङ्गीकृतः, यतः तोखारी-हित्ती-भाषा पूर्वप्रदेशे सन्ति तेषु च केन्टुम्-सदृशः क-ध्वनिः लभ्यते, न तु एस-ध्वनिः

**(ख) केन्टुम् च शतम् वर्गः** (भारोपीय परिवारस्य -विभाजनम्)

भारत-यूरोपीय-परिवारःकेण्टुम्-शटम्-वर्गस्य आधारेण विभाजनम् ।।शतम् वर्ग

**केन्टुम् वर्ग**

१. भारत-ईरानी (आर्य)

२. बाल्टो-स्लाविक

३. आर्मीनी

४. अल्बानी (इलीरी)

५. ग्रीक

६. केल्टिक

७. जर्मानिक (ट्यूटानिक)

८. इटालिक

९.हिटाइट

१०. तोखारी

भारोपीय परिवारस्य लक्षणम्।।

१. रचनादृष्ट्या इदं कुटुम्बं विभक्तिात्मकम् । अयमकुटुम्बस्य मूलभाषाः, संस्कृत, ग्रीक, लैटिन इत्यादयः कृत्रिमाः आसन्, परन्तु तेभ्यः विकसिताः आधुनिकाः भाषाः हिन्दी, आङ्ग्ल इत्यादयः विश्लेषणात्मकाः अभवन् । एतेषु प्रत्ययकार्यं विभक्त्यादिभ्यः गृह्यते। बालकं यथा बालकं पठति, पठतिः > पठति। रूसी, लिथुआनिया इत्यादयः भाषाः अद्यापि विभक्ताः सन्ति । वर्तमान इरानी पूर्णतया विच्छेदकः अभवत् । अस्य सम्पूर्णं व्याकरणं एकस्मिन् पृष्ठे लक्षयितुं शक्यते ।

२. प्रकृति + प्रत्ययस्य वा अर्थतत्त्वस्य सम्बन्धतत्त्वस्य च संयोगेन शब्दनिर्माणं भवति स्म । एषः संयोगः बहिर्मुखी आसीत् ।

३. एतेषां प्रत्ययानां स्वतन्त्रार्थः आसीत् इति अद्यापि न सिद्धम् । आङ्ग्ल -ly (lee) इत्यादीनां स्वतन्त्रार्थः व्युत्पन्नः, परन्तु शेषः संदिग्धः अस्ति। प्रत्ययाः नित्यं स्वतन्त्राः शब्दाः आसन् इति न निष्कर्षः ।

४. इन्डो-यूरोपीयभाषायाः धातुः अधिकतया एकाक्षरयुक्ताः आसन् ।

५. शब्दनिर्माणप्रत्ययौ द्वौ प्रकारौ आस्ताम् (क) कृत, ये साक्षात् मूले योजिताः आसन्। एते प्राथमिकप्रत्ययाः उच्यन्ते । यथा भूत, भूत। (ख) तधित: कृत-प्रत्यय-योगेन निर्मितेषु शब्देषु एते योजिताः भवन्ति। यथा भूतः शारीरिकः। एते गौणप्रत्ययाः उच्यन्ते । शब्दान् वा शब्दान् वा निर्मातुं द्विविधाः प्रत्ययाः प्रयुक्ताः आसन्- (क) प्रकरणनिर्देशकाः प्रत्ययाः, संज्ञाभ्यः प्रकरणचिह्नानि, (ख) धातुभ्यः क्रियाप्रत्ययाः, कालसूचकाः चिह्नानि इत्यादयः। एते स्थितिरूपाः प्रत्ययाः सन्ति।

६. तत्र सम्बन्धतत्त्वसूचकानाम् उपसर्गानाम् अभावः आसीत् । प्रारम्भे उपसर्गाः स्वतन्त्राः शब्दाः आसन् । ते कर्मणा सह तथा धातोः पृथक् प्रयुक्ताः आसन्। पश्चात् स्वतन्त्रार्थस्य हानिः कारणतः एते उपसर्गाः अक्षरशः न अपितु भिन्नार्थानां सूचकाः अभवन् । एतेषां कारणात् धातुनां अर्थः परिवर्तते । सूचकत्वे धातुतः पृथक् न प्रयुज्यन्ते । यथा आचरण, विचार, संचार, प्रचार आदि। ग्रीक, लैटिन, २. जर्मन इत्यादिषु अपि एतादृशी प्रवृत्तिः अस्ति ।

७. वाक्यविन्यासः वाक्यैः निर्मितः आसीत्, न तु शब्दैः । शब्देषु प्रत्ययान् (प्रकरणचिह्नानि) योजयित्वा शब्दाः निर्मीयन्ते स्म, धातुषु च प्रत्ययान् (कालचिह्नानि) योजयित्वा शब्दाः निर्मिताः भवन्ति स्म । वाक्येषु केवलं शब्दाः एव प्रयुक्ताः आसन् ।

८. समासस्य प्रवृत्तिः मूलभारतीय-यूरोपीयभाषासु आसीत् यत् तेषां संयोजनेन बृहत्तरशब्दानां निर्माणं भवति स्म । सा इन्डो-यूरोपीय-कुटुम्बे अपि निवसति स्म । सर्वश्लोकानां मध्ये विभक्तयः नष्टाः अभवन् । सर्वैः शब्दैः नष्टविभक्तेः अर्थः अपि व्याख्यातः । सर्वेषां पदानाम् स्वतन्त्रः अर्थः आसीत् । संस्कृते समासशब्दयुक्ताः शब्दाः अपि सन्ति, येषु मध्यमविभक्तिः न नष्टा भवति। जैसे- सरसिज, मनसिज, युधिष्ठिर, परस्मापद, आत्मनेपद आदि। इयं प्रवृत्तिः अद्यत्वे अपि संस्कृत-जर्मन-भाषायां, आयर्लैण्ड-देशस्य वेल्स्-भाषायां च वर्तते । संस्कृते सुबन्धु, बाण इत्यादीनि गद्यानि अस्य उदाहरणानि सन्ति । वेल्शभाषायां एङ्गलेसीद्वीपे स्थितस्य ग्रामस्य समासनाम ५८ अक्षराणि सन्ति ।

९. स्वर-श्रेणीकरणम् - मूलभारतीय-यूरोपीयभाषासु उच्चैः स्वराणां कारणेन स्वर-क्रमाक्रमः (गुणः, वृद्धिः, दीर्घीकरणं) आसीत् । इन्डो-यूरोपीयभाषासु मूलप्रत्ययाः अन्तर्धानं जातम्, स्वरपरिवर्तनद्वारा अर्थपरिवर्तनं कर्तुं आरब्धम् । यथा, आङ्ग्लशब्देषु - Drink-Drank-Drunk; रिंग-रङ्ग-रुंग , देव > दैव, विधि > वैध, कुमार > कौमार। इत्यादि ।

१०. प्रत्ययानां प्रचुरता – इन्डो-यूरोपीयभाषासु प्रत्ययानां प्रचुरता अस्ति । श्रोतंभाषातः पृथक् अनेकाः भाषाः विकसिताः । अस्मिन् संक्रमणकाले बहवः मूलप्रत्ययाः नष्टाः अभवन् । तेषां स्थाने नूतनसम्बन्धसूचनार्थं नूतनाः प्रत्ययाः निर्मिताः । अतः प्रत्ययानां संख्या अतीव अधिका अभवत् ।

**संस्कृते भाषाभेदः**

संस्कृते तु भेदा एवमुपलभ्यन्ते । तत्र तावदिदं सर्वसंमतत्वेन निर्धारितं यज्जगति समुपलभ्यमानसमस्तप्राचीनतरग्रन्थेष्वतिप्राचीनतम ऋग्वेद एव । तस्य कैश्चित् मन्त्रैस्तस्मिन्नेव काले भाषाभेदः प्रारंभः, किंवा विशुद्धभापायां दोषप्रसक्तिः सूच्यते ।

तद्यथा-

इमे येनार्वाङ न परचरन्ति न ब्राह्मणासो न सुतेकरासः । त एते वाचमभिपद्य पावया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः ।।' अस्यायं भावः ।" इमे ये अविद्वांसः अर्वाक अर्वाचीनमधोभाविन्यस्मिन् लोके ब्राह्मणैः सह न चरन्ति ये परः परस्तादेवैः सह न घरन्ति, ते ब्राह्मणासो ब्राह्मणा वेदार्थतत्परा न भवन्ति, तथा सुतेकरासः "सोमं सुतमभिषुतं कुर्वन्तीति सुतेकरा" ऋत्विजः तेऽपि न भवन्ति, अप्रजज्ञयः अविद्वांसः त एते मनुष्याः वाचं लौकिकीम् अभिपद्य प्राप्य, तया पापकारिण्या वाचा युक्तास्ते सिरीः सीरिणः कपेका भूत्वा तन्त्रं कृषिलक्षणं, तन्वते विस्तारयन्ति । तथा च कृषीवलानां वाचि मन्त्रवागपेक्षया किंचिन्न्यूनत्वमुपलक्ष्यते । तेषां सम्यगुच्चारणं नाजायत, अतोऽपशब्द बाहुल्यमिति । अतएव च-

सक्तुमिव तितना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।

अत्रा सखायः सख्यानि जानते, भद्रेषां लक्ष्मीनिहिताधिवाचि ॥ इति मन्त्रेण विद्वांसोऽपशब्देभ्यो विविच्य सुशब्दादेव ध्रुवते स्मेत्युच्यते । यथाहि दृश्यते लोके सतुषं सक्तुं तितउना - चालिन्या विशोध्यते, एवमत्रापि मनीषिभिः अपशब्देभ्यः सुशब्दाः पृथक क्रियन्ते । तदेवं विशुद्धवाचि दोषप्रसक्तिरवगम्यते तदेति ।

**देवीभाषा मानुषीभाषा च**

इदं च ब्राह्मणग्रन्थेष्वप्युपलभ्यते स्पष्टरूपेण । तत्र हि देवी मानुषीभेदेन भाषाभेदः क्रियते तद्यथा - "शर्मासीति मन्त्रस्य ब्राह्मणे" चर्म वा एतत् कृष्णस्य तदस्य तन्मामुषम् शर्मदेवत्रा तस्मादाह शर्मासीति ।

किंच "स यदिदं पुरा मानुषीं वाचं व्याहरेत्, तत्रो वैष्णधीमृचं वा यजुर्व्वा जपेत् इत्येवमादिभिर्वैदिकवचनैः प्राकाले भाषाद्वयसत्तेति ज्ञायते सहैवेदमप्यवगम्यते यदेकस्या देवभाषाया यज्ञादिकाले व्यवहारो नतु मानुया वाच इति । यदि प्रमादात् कश्चित्तत्र मानुषीं भाषां व्यवहरेत् तदा दोषभाग् भवेदिति । अत्र विचारेणेदं प्रतीयते यद्वैदिकी भाषा, दैवीभाषेत्युच्यतेस्स या तु ततः किंचिद्भेदमापन्ना व्यावहारिकी भाषा "यामद्यत्वे संस्कृत-मिति व्यवहरन्तिस्म लोकाः " सा मानुषी भाषेत्युच्यतेस्म । अद्य तु द्वयमपि वयं देवभाषेत्येव वदाम इत्यन्यदेत्तत् ।अथ प्रकृतिसिद्धादुच्चारणदोषात् तत्रोभयत्रापि अपभ्रंशा आपतन्तिस्म । तदेवमतिप्राचीनकाला देवोच्चारणभेदाद् भाषाभेदः समुपलभ्यते ।

वस्तुतस्तु भेदोऽयमवान्तरः, न तु मौलिकः । न हीदानीं यथा संस्कृत, ग्रीक, लेटिन, प्रभृतिषु भाषासु पारस्परिको भेदो दृश्यते तथा तयोर्वैदिकलौकिकयोर्भायोरिति । इयमेव भाषाद्वयीधारा निरुक्तकृत्यास्कपर्यन्तम् पाणिनिपर्यन्तं च प्रवहन्ती दृश्यते । तदेतद् भूयसा आह यास्कः "नेति प्रतिषेधार्थीयो भाषायाम्" "उभयमन्वध्यायमित्यादि" । अत्राध्यायपदेन वैदिकी भाषा गृहीता, "भाषा" पदेन च लौकिकी । किंच प्राह पाणिनिरपि"चतुर्थ्यर्थे बहुलं छन्दसि' "प्रथमायाश्च द्विवचने भाषायाम् भाषायां सदवशश्रुवः इत्यादि । तदेवं छन्दस्त्वं भाषात्वं चेति वाचोभागद्वयं जातम् ।इदं च भागद्वयं न वस्तुतो भाषाभेदप्रयोजकम्, अपितु एकस्या एव भाषाया अवान्तरौ द्वौ विभागाविति स्पष्टं शक्यते वक्तुम् । यथा ह्यद्यत्वेऽपि एकैव हिन्दी भाषा विभिन्नेषु देशेषु बहून् भेदान् विगाहते । यथा वा पद्येषु निबद्धा हिन्दी भाषा, व्यवह्रियमाणहिन्दी भाषापेक्षया किंचिद्वैलक्षण्यं भजत एव । आङ्गलभाषादिष्वपि पद्यभाषापेक्षया गद्यभाषायाम्, ग्रन्थभाषापेक्षया च परस्परव्यवहारभाषायां वैलक्षण्यं स्पष्टमनुभूयत एव । तथापि न भाषाभेदो व्यवह्रियते, अपितु एकस्यामेव भाषायां तेऽवान्तरभेदा संमान्ति । तथैव पूर्वस्मिन्नपि काले

वैदिकव्यावहारिकभाषयोरवान्तरं वैलक्षण्यं भवतु नाम, तथापि न तद् भाषाद्वयमिति गणयितुमुचितम् । तत एव “संस्कृतम्” "प्राकृतम्” इति नामभेदः प्रवृत्तो भाषासु । प्राकृतमपि च देशभेदेन बहून् भेदानवाप्तम् ।तदुक्तं परमाचार्येण भरतेन-

मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी ।

बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥ इति ।

व्यवहारे च तत्तद्भाषाणां तत्तद्देशेषु वर्णविशेषप्राधान्यमालोच्य त्वेवमुक्तं तेन-

गङ्गासागरमध्ये तु ये देशाः संप्रकीर्तिताः । ; एकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत् ॥ विन्ध्यसागर मध्ये तु ये देशाः श्रुतिमागताः । नकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत् ॥ सुराष्ट्रावन्तिदेशेषु वेत्रवत्युत्तरेषु च । ये देशास्तेषु कुर्वीत चकारखहुलामिह ॥ हिमवत्सिन्धुसौवीरान् ये जनाः समुपाश्रिताः ।उकारबहुलां तज्ज्ञस्तेषु भाषां प्रयोजयेत् ॥ इत्यादि । किंचाह रुद्रोऽपि -

प्राकृत-संस्कृत-मागध-पिशाचभाषाश्च शूरसेनी च ।

षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः ॥ इति ।

विनैव शिक्षां प्रकृत्या या समुच्चारिता आसीद् भाषा, सा प्राकृतमित्युच्यतेस्म । या तु प्राप्त शिक्षासंस्कारैर्विद्वभिरुच्चार्यतेस्म सा संस्कृतमिति नाम्ना व्यवह्रियते स्म । स एष मध्यमः कालः ।

प्राकृतशब्दं हि द्वेधा व्युत्पादयन्ति समीक्षाचणाः । प्रकृतिः संस्कृतम् तत आगतं प्राकृतमिति प्राकृत व्याकरणकर्तार आहुः । प्रकृत्योच्चारितं प्राकृतमिति तु ऐतिहासिकाः ।अनेन व्युत्पत्तिद्वयेन सुस्पष्टमिदं सिद्धं यत् प्राकृतमिति प्रसिद्धा भाषा संस्कृतादुत्पन्ना विनैव शिक्षां व्यवहारेण गृह्यमाणा चासीदिति ।पुनरपि प्रकृतिसिद्धं परिवर्तनं प्रचलदेवासीत, तेन श्राकृतमपि दूरे नीतम् । अपभ्रंशभाषास्तु व्यवहारे प्रतिष्ठापिताः । पुनश्चापभ्रंशभाषा अपि दूरीभूताः, हिन्दी, मराठी, बंगला, मैथिलीत्याद्यास्तु साम्प्रतमुपलभ्यन्ते । अत्रापि च प्रचलत्येव प्राकृतपरिवर्तनक्रम इति न तिरोहितं समीक्षादक्षाणाम् ।

तदेवं तामिल तेलगु नामिकाः काश्चिद् भाषा विहाय भारतीयाः सर्वा अपि भाषा वैदिक भाषात एव संस्कृतादिक्रमेण समुदपद्यन्त इति तु सर्वतन्त्रसिद्धान्त एव । परं भारताद् बहिः यूरोपादिदेशेषु प्रचलिता अमि भाषा वैदिकसंस्कृतभाषाया एव समुत्पन्ना इति बहूनामन्वेषकाणां विश्वासः । कल्पित भाषा :

या हि चीनी-तिब्बतीप्रभृतयो भाषाः पूर्वमुदाहृताः, वास्तु कृत्रिमरूपेण तत्र समाजे कल्पिता इति तत्स्वरूपेणैव व्याख्यातप्रायम् । अत तन्त्रवार्तिके कुमारिलभट्टमहाभागाः द्राविडादिभाषायाः चोर्, अतर, पाप, माल, वैर, इत्येतेषां शब्दानां यथाक्रमम् - ओदन, मार्ग, सर्प, सत्य, उदररूपेष्वर्थेषु कल्पनप्रकारमुद्भाव्य बर्बरादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्त इति न विद्म इत्याहुः ।

तद्यथा - ओदनं चोरित्युक्ते चोरपदवाच्यं कल्पयन्ति, पन्थानमतरित्युक्तेऽतर इति कल्पयित्वाऽऽहुः सत्यं दुस्तरत्वादतर् एव पन्था इति, तथा पाप शब्द् पकारान्तं सर्पवचनमकारान्तं कल्पयित्वा सत्यं पाप इवासाविति वदन्ति । एवं मालशब्दं स्त्रीवचनं मालेति कल्पयित्वा सत्यमित्याहुः, बैर्शब्दं च रेफान्तमुदरवाचनं वैरिशब्देन प्रत्याम्नायं वदन्ति, सत्यं सर्वस्य क्षुधितस्याकार्ये प्रवर्तनादुदरं वैरिकार्ये प्रवर्तत इति, तद्यदा द्राविडादिभाषायामीदृशी स्वच्छन्दकल्पना तदा पारसी - बर्बर - यवन - रोमकादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्त इति न विद्मः ? इति ।

एवंविधसंकेतकरणं प्राक्तनेऽपि काले समुपलभ्यते । यथा महाभारते पाण्डवानां लाक्षागृहदाहप्रसङ्गे धर्मात्मना विदुरेण धर्मराजो युधिष्ठिरः विचित्रया संकेतभाषया समुद्बोधितः । तथाहि-

प्राज्ञः प्राज्ञप्रलापज्ञः प्रलापज्ञमिदं वचः ।

प्राज्ञं प्राज्ञः प्रलापज्ञः प्रलापज्ञं वचोऽब्रबीत् ॥

तत्र समाजे तदनर्थकं वचो न कैरपि किंचिदपि बुद्धम् । अतएवानुपदं कुन्ती युधिष्ठिरं प्राह-

क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवनिव । त्वया च स तथेत्युक्तो जानीमो न च तद् वयम् ॥ इति । अपि च विभिन्नेषु देशेष्वेवंविधामन्यैरबोध्यां संकेतभाषां कल्पयन्ति वंचकाः । एवमेव तिब्बत - चीनप्रभृतिदेशेष्वपि कस्मिंश्चित् काले कैश्चित् पटुभिस्तथाविधा भाषाः कल्पिताः स्युः । अत्र विस्तरस्तु इतिहासान्वेषकैरेव लभ्यः ।

**वैदिकभाषैवादिभाषा**

तासां भाषाणां कथा तु पृथगभूता, किन्तु प्रकृतिप्रत्ययादिसन्निवेश विशिष्टा नामक्रियादिभेदवत्यो याः ग्रीक - लैटिन-अंग्रेजीप्रभृतयः प्रचलन्ति, तास्तु बहुतरं सम्बन्धं वैदिकभाषया संस्कृतभाषया वा वहन्तीति क्रमेणाधिकाधिकं प्रत्ययभाजो भवन्त्यन्वेषका विद्वांसः । सम्बन्धिशब्दास्तु एकमूला एव बहुत्र प्रचलन्तीति बहोः कालात् प्राङ निर्धारितं गवेषकैः ।

**संस्कृतम् ग्रीक**

पितृ - पैटर

मातृ - मैटर

भ्रातृ - फ्रैटर

दुहितृ - दुगेटर , दुगेरट

**अंग्रेजी संस्कृतम्**

पितृ – फादर , फ्राटर

मातृ - मदर

दुहितृ - डाटर

भ्रातृ - ब्रदर

स्वसृ ( समक्षीरा)- सिस्टर इत्यादि ।

**लैटिन जर्मनी**

पैटर - पैटर

मैटर - मिटर

विधवा - विडो

**पारसी ( फारसी )**

पीदर  सन्

मादरः दुख्तर

परमितोऽन्येऽपि बहवः शब्दाः संस्कृतभाषात एव निःसृताः प्रतीयन्त इति दिङ्मात्रेणानुपदं प्रदर्शयिष्यते विकृतिप्रकरणे ।

ततः पूर्वमपि प्राकृतमिति केचन यूरोपीयास्तदनुयायिनश्च केचन विद्वांसोऽत्र विप्रवदन्ते । तेऽद्यानुमिन्वते यत् संस्कृत वैदिकभाषा न सर्वतः प्रथमा शक्याऽभ्युपगन्तुम्, किन्तु ततोऽपि पूर्वमासीत् काचन प्राकृतमिति समाख्याता भाषा, ततएव समुत्पन्ना वैदिकी भाषा संस्कृतभाषा च । नाटकेपूपलभ्यमाना विविधाः प्राकृतभाषा अपि तत एव समुदपद्यन्त । अन्या अपि च यूरोपीयादिभावास्तस्या एव सन्ततीभूताः । तस्याः किमासीत् स्वरूपं कियांश्च प्रसिद्धायाः संस्कृतभाषाया अपेक्षया, वैदिकभाषापेक्षया वा तत्रासीद् भेद इति तु न केनाप्यद्यावधि निर्णेतुं पारितम्, परमासीत् सेति सर्वेऽपि रारटन्ति । स्वभाव एवैष यूरोपीयाणां यत्ते प्रसिद्धं परित्यज्याप्रसिद्धमूलं परिकल्पयितुं भवन्ति संनद्धा इति । यथाहि मनुष्यादेव मनुष्योत्पत्तिरिति न ते क्षुमन्ते, किन्तु मनुष्याणां भूलभूता काचन अप्रसिद्धा गोरेला जातिरिति प्रतिष्ठापयन्ति । तथैवात्रापि सुप्रसिद्धायाः संस्कृतभाषाया भाषान्तराणामुत्पत्तिर्न तेभ्यो रोचते, अपितु मूलभूता काचिदन्यैवासीद् भाषेतिकल्पनं तान् प्रीणयति ।

अत्र च युक्तिरेषा समुपन्यस्यते यत् " प्राकृतम् संस्कृतम्" इति च भापयोर्नामैवैकस्याः कृत्रिमत्वम् अपरस्याश्च सर्वादित्वं ख्यापयति । संस्कृतमिति कृतसंस्कारां वाचमाचष्टे पदम् । नहि संस्कारेण विना संस्कृतमिति केनाप्युच्यते । संस्कारश्च मनुष्यक्रियया निष्पाद्य इति स्पष्टं कृत्रिमत्त्वं संस्कृतभाषायाः ।

**ध्वनिविमर्शः**

ध्वनेरुत्पत्तिप्रकारः प्रदर्शितः । अत्र च पुनस्तद्भेदविकासादिकं परिचिन्त्यते । तत्र तावद् ध्वनति ध्वनयति वेति व्युत्पत्त्याध्वनिरितिपदेन शब्दो गृह्यते, ध्वन्यत इत्यनया निरुक्त्या चार्थोऽपि । यत्र ध्वनिपदेन शब्दो गृहीतः, तत्र स शब्दो व्यक्ताव्यक्तसाधारणध्वनिरूपः । यथा पदार्थयोरभिघाताख्यसंयोगात् 'पटत्' पटदि'ति, विभागाच्चवेणोः 'चटचटेति', अव्यक्ता ध्वनयः प्रभवन्ति, तथैव सति सामर्थ्यं वक्तुरीहायां च, जिह्वाव्यापारेण ताल्वादिस्थानेषु वायोः संयोगाद् व्यक्ता वर्णरूपा ध्वनयः प्रादुर्भवन्ति । तत्रोभयत्रापि ध्वनिशब्दव्यवहारः प्रचलति लोके । तद्यथा अव्यक्तध्वनिषु कंकण - किंकिणी-नूपुरध्वनयः श्रूयन्त इत्युच्यते । व्यक्तध्वनयस्तु विकृताविकृतरूपेण जनैरुच्चार्यन्त एव । विकाराः खल्वपि व्यक्तध्वनिषु परिलक्ष्यन्ते, यतो हि ते वर्णरूपाः सन्ति । नहि निर्वर्णे अनाकृतौ विकारः संगच्छते ।अस्तु, प्राणिनां ध्वनौ सर्वत्र संस्काररूपा प्रतिभैव भवति कारणमित्युक्तं वाक्यपदीये । तथाहि-

अभ्यासात् प्रतिभाहेतुः सर्वः शब्दोऽपरैः स्मृतः ।

बालानां च तिरवां च यथार्थप्रतिपादने ॥ इति । ।।

अर्थात् 'येऽप्यविदितसंकेता अमी बाला, जडप्राया वा तिर्यञ्चः, तेपा मप्यनादिवासनावशात्तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडानामपि प्राणिनां नियतपदः शब्दः संबोधनायोदीर्यते । तेन प्रतिनियतजात्यनुसारेणैव नियतैव काचित् प्रतिभा बोध्यत इति तन्मूल एव सर्वः कश्चित् तेषां व्यवहारः' इति तद्व्याख्याने पुण्यराजः ।

सारांशस्तु - यदि पश्वादिषु स्वाभाविकी प्रतिभा नान्वमंस्यत तदा मनुष्याह्वाने पशवः कथं प्रवृत्ता अभविष्यन् । दृश्यते च नियताह्वानशब्दप्रयोगे त एव पशवः समागच्छन्ति यान्ति च । यथा 'आतु' 'तू' (आयातु) इत्युग्राहाने ( गोहराना ) पुच्छमान्दोलयन् वा क्षिप्रमायाति, 'दुर दुरे ति उच्चारणे च पलायते सः । एवं गजप्रेरणे हस्तिपका 'गच्छ' 'गच्छ' इति ब्रुवते, गोपालाश्चाह्वाने गवाम् 'अही' 'अही' 'ही' (एहि

) इति पदं प्रयुंजत एव ।अपि च यदा गावः 'हुँ कुर्वन्ति, वत्साश्च तत्क्षणमेव 'ब' इति वदन्ति । तथा च तत्रापि वाचैव व्यवहारो लक्ष्यते । पशूनामपि वाचैव व्यवहार इति तु तैत्तरीयब्राह्मणे स्पष्टमुक्तम् वाचं देवा उपजीवन्ति विश्वे, वाचं गन्धर्वा पशवो मनुष्याः इत्यादिना । तस्मात् प्रतिभारूपः संस्कारः स्वीकार्यः । तेन च-

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः ।

जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ॥

इत्यादीनामप्युक्तं समाधानं साधु । नहि संस्कारमन्तरेण तथा भवितुमर्हतीति निश्चितम् ।

तदित्थं व्यक्ताव्यक्तध्वनिरूपः शब्दः प्राणिमात्र व्यवहारोपयोगी सिद्धः ।

**बोधप्रश्नाः**

1 भाषायाः वर्गीकरणं किं ?

2 पारिवारिक वर्गीकरणं किं ?

3 आकृतिमूलकवर्गीकरणं किं ?

4 ध्वनिविज्ञानं किं ?

# खण्डः ३

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- सारांशः
- बोधप्रश्नाः

## प्रस्तावना

ध्वनिविज्ञानस्य परिचयप्राप्तेः परं तत् प्रयुक्तानां नियमानां पाठः तु छात्राणां कृते दीयते। अत्रापि ध्वनिनियमेन साकं ध्वनिपरिवर्तनस्य विचारः कारणानि च अस्मिन् खण्डे क्रियते। पदविज्ञानम्, वाक्यविज्ञानम्, अर्थविज्ञानम् इति भाषाविज्ञानस्य अन्यानि उपादानानि अत्र वर्णितानि। खण्डेऽस्मिन् वैदिकसंस्कृतम्, लौकिकसंस्कृतम्, पालि एवं प्राकृत इति भाषाभेदानां विचारः छात्रैः प्राप्यन्ते।

## उद्देश्यम्

- ध्वनिनियमस्य स्वरूपज्ञानं भवति।
- ध्वनिपरिवर्तनस्य विचारः कथम् इति ज्ञानमागच्छति।
- ध्वनिपरिवर्तनस्य कारणानि कानि इति ज्ञानं जायते।
- वैदिकसंस्कृतम्, लौकिकसंस्कृतम् इति भेदद्वयम् छात्रैः ज्ञायते ।
- पालि एवं प्राकृत इति भाषाभेदानां विचारः छात्रैः प्राप्यन्ते।

**ध्वनिशास्त्रस्य ध्वनिविज्ञानस्य च भेदः**

१. ध्वनिविज्ञानं वा वाक्ध्वने: ध्वन्यात्मकं रूपम् । अस्मिन् वाक्-ध्वनिः ध्वन्यात्मकं अस्ति । प्रत्येकं वाक्-ध्वनिः एकः एककः भवति । यदि भवन्तः शतवारं 'K' इति वदन्ति तर्हि १०० [K] एककाः भविष्यन्ति । कण्ठात् मृदुतालुतः वा उच्चारितः शब्दः शतवारं उक्तः इति अर्थः । अस्य कृते [] कोष्ठकं प्रयुज्यते ।

२. ध्वन्यशास्त्रे अथवा ध्वन्यशास्त्रे ध्वनिः एकः जातिः, वर्गः, जातिः वा भवति । अस्मिन् १०० वा असंख्यवारं वा उक्त्वा अपि 'के' एकः एककः अभवत् । इयं कत्वजातिः, तिर्यक्रेखाद्वयं // वा हिन्दीभाषायां सुविधायै द्वे ऋजुरेखा इति उच्यते। पङ्क्तिमध्ये लिख्यते, यथा /क/,। ख.

३. ध्वनिविज्ञानं ध्वनिविज्ञानस्य आधारः अस्ति । ध्वन्यशास्त्रे प्रत्येकं ध्वनिः क्रमबद्धः भवति । तस्य आधारेण तेषां ध्वनयः (ध्वनयः) वर्गाः ध्वन्यशास्त्रे निर्मीयन्ते । सूचकाङ्कात् जीवभाषायाः शब्दाः प्राप्यन्ते, मृतभाषायाः शब्दाः च साहित्यात् प्राप्यन्ते ।

(क) ध्वनिरूपम्

भाषायां शब्दाः द्वौ प्रकारौ दृश्यन्ते - १. ध्वन्यात्मक (ध्वन्यात्मकं वा ध्वन्यात्मकं वा), (2) ध्वन्यात्मकं (ध्वन्यात्मकं वा ध्वन्यात्मकं वा)। तयोः मौलिकः अन्तरः अस्ति यत् ध्वन्यात्मकं वा ध्वन्यात्मकं वा चिह्नं वाक्ध्वनिस्य एककं सूचयति । क् १०० वारं वदन् १०० [क्] [क] एककाः उत्पन्नाः । इदं द्वयोः कोशिकायोः इति कथ्यते . यथा [क], [ख] । ध्वन्यात्मकःएकस्य जातेः एकः ध्वनिः एव अवशिष्यते जाति वा वंशः, इति व्यक्तिः ।

(ख) ध्वनिनाम तथा संस्वनं

ध्वन्यं वा ध्वन्यं वा जातिः शब्दः च व्यक्तिः । ध्वनिः तिर्यक्रेखाद्वयस्य अन्तः लिख्यते // । हिन्दीप्रकारे तिर्यक्रेखानां सुविधाभावात् क्षैतिजरेखाद्वयस्य मध्ये अपि लिख्यते । यथा ख ख ग शब्दः। के . छ.. छ. लिखिष्यति। एलोफोनः संध्वनी इति अपि कथ्यते । अल्लो इत्यर्थः एकः वा अन्यः वा । अलोस् इति ग्रीकशब्दस्य लघुरूपम् अस्ति । ग्रीकभाषायां अन्यस्य अर्थः । दूरभाषस्य अर्थः स्वरः वा शब्दः वा । अतः एलोफोन इत्यस्य अर्थः पृथक् अथवा व्यक्तिगतध्वनिः । एकस्मिन् ध्वने अर्थात् एकस्मिन् जाते बहवः शब्दाः वा शब्दाः वा भविष्यन्ति, ते भिन्नाः शब्दाः इति गण्यन्ते। शब्दाः कोष्ठकद्वयस्य मध्ये लिख्यन्ते । यावन्तः प्रकाराः स्युः तावन्तः तद्सङ्ख्यायाः इति मन्तव्यं तदर्थं च तेषां पुरतः १, २, ३ इत्यादयः सङ्ख्याः दत्ताः, यथा 'क', 'क', 'क्कु', १. 'क्क' इति पृथक् संस्वान् । तेषां पृथक्त्वं सूचयितुं ते द्वयोः कोष्ठकयोः मध्ये लिखिताः भविष्यन्ति - .

[प्र-1], [प्र-2], [प्र-3], [प्र-4], [प्र-5], [प्र-6]। के ६ प्रकाराः सन्ति – कला, किम्पी, कुल, शक्त, क्काम्, क्काचित । तेषां उच्चारणेऽपि किञ्चित् भेदः अस्ति। प्रत्येकस्य उच्चारणभेदस्य आधारेण 'ख' इत्यस्य ६ संस्करणाः आसन् । भेदं कर्तुं प्रत्येकस्य प्रत्ययस्य पार्श्वे सङ्ख्या लिखिता अस्ति । ध्वनिभेदानुसारं एलोफोनाः भिन्नाः भविष्यन्ति, परन्तु ध्वनिः समानः एव तिष्ठति । अस्य आधारेण एकस्य ध्वनिस्य अनेकाः उच्चारणाः सन्ति ।

(ग) ध्वनिव्यञ्जनानां क्रमणं

ध्वनिव्यञ्जनानां क्रमाङ्कने द्रष्टव्यं यत् (१) कति मूलध्वनयः सन्ति। यावन्तः ध्वनयः भविष्यन्ति तावन्तः मूलध्वनयः सन्ति। (२) एकस्यैव वर्गस्य वा जातिस्य वा सर्वे शब्दाः तस्य वर्गस्य एलोफोनाः भविष्यन्ति। यथा, संस्कृत हिन्दीभ्यां एकैकं वाक्यं गृह्यते-

१. कमले कमला शेते।

२. केवलं रामस्य एव जीवितुं शक्तिः अस्ति।

संस्कृते /लु/ ध्वन्यस्य २ पृथक् पृथक् ध्वनयः एव दर्शिताः सन्ति । अस्य कारणं यत् उपर्युक्ते वाक्ये ल द्विधा - ल + ए, + ल आ (ले, लाला) इति, अतः द्वे ल संसवान इति मन्तव्यम् । एकप्रकाराद्यः एकप्रकाराः, अतः कगुणचिह्नेन एकः शब्दः गुणितः ।

हिन्दीभाषायां केवलं द्वौ प्रकारौ ध्वन्यौ दत्तौ । एकस्मिन् 'नि' शुद्धे न शब्दः, अन्यस्मिन् 'हैन्' इति ननुनासिकरूपम्। शेष ब्यादिध्वनानां एकमेव रूपं भवति, अतः एकः संस्वनः दर्शितः । तस्य पुरतः गुणनचिह्नं स्थापयित्वा गुणितं कृतम् अस्ति । तस्य शब्दस्य उच्चारणे अवकाशः, प्रयत्नः, परिमाणं च भवति चेत् एव भिन्नाः शब्दाः दर्शिताः भविष्यन्ति। तत्र किञ्चित् भेदादिः भविष्यति। भाषाविदः विश्वस्य सर्वासु भाषासु परीक्षणं कृत्वा विश्वस्य केषुचित् भाषासु न्यूनातिन्यूनं १५ वा २० वा ध्वनयः सन्ति, केषुचित् ५० वा ६० वा यावत् ध्वनयः सन्ति इति ज्ञातवन्तः । कस्यापि भाषायां ६० तः अधिकाः ध्वनयः न सन्ति । भाषादृष्ट्या ध्वनिनामानां समाहारः ३० भवति ।

**भाषायाः उत्पत्तिसिद्धान्तः**

स्वाभाविकतया प्रथमः प्रश्नः उत्पद्यते यत् भाषायाः उत्पत्तिः कथं अभवत् ? अयं विषयः अतीव जटिलः अस्ति, अस्मिन् विषये प्राचीनकालात् चर्चाः अभवन्, परन्तु ते अपूर्णाः, अनिर्णयात्मकाः च सन्ति ।भाषायाः उत्पत्तिः कोटिवर्षेभ्यः पूर्वं अभवत्; १८६६ तमे वर्षे पेरिस्-नगरे भाषाविज्ञानस्य समितिः स्थापिता । तेन स्वस्य अधिनियमे निर्देशाः दत्ताः यत् भाषायाः उत्पत्तिः विश्वभाषायाः निर्माणं च अत्र न विचारितम्, भाषायाः उत्पत्तिविषये मुख्यसिद्धान्तद्वयं अस्ति-

१-प्रत्यक्षमार्गः

२- अप्रत्यक्षमार्गः

प्रत्यक्षमार्गे भाषायाः उत्पत्तेः मुख्यबिन्दून् आधारं गृहीतुं प्रयत्नः क्रियते । प्रत्युत परोक्षमार्गे भाषायाः वर्तमानं भूतरूपं च सर्वेक्षणं भवति केचन विद्वांसः भाषायाः उत्पत्तिं भाषाविज्ञानस्य विषयत्वेन न मन्यन्ते

। भाषायाः उत्पत्तिःविद्वद्भिः दत्ताः सर्वे सिद्धान्ताः सर्वथा तार्किकाः न सन्ति । अस्मिन् अध्याये वयं भाषायाः उत्पत्तिसम्बद्धानां सिद्धान्तानां चर्चां करिष्यामः ।

**दिव्योत्पत्तिसिद्धान्तः-**

एषः भाषायाः उत्पत्तिविषये प्राचीनतमः सिद्धान्तः अस्ति । यथा परमपिता ब्रह्मा मनुष्यान् सृष्टवान्, तथैव मनुष्याणां भावनां प्रकटयितुं परिष्कृतभाषा अपि दत्तवान्, तथैव संस्कृतभाषा ईश्वरेण दत्ता अस्ति। अस्याः सृष्टेः आरम्भे एव शक्तिः अस्मान् वेदज्ञानं प्रदत्तवती । वैदिकसंस्कृतभाषा मूलभाषारूपेण प्राप्ता, संस्कृतभाषायाः तस्य व्याकरणस्य च मूलभूताधारा, पाणिनीयस्य १४ सूत्राणि शिवस्य दमरुतः आगतानि। वेद-उपनिषद-स्मृति-दर्शन-ग्रन्थेषु प्रमाणानि सन्ति यत् वेदानां उत्पत्तिः ईश्वरतः अभवत् -

देवी वाचमजनयन्त देवास्तां विश्वरूपाः पश्वो वदन्ति। (ऋग्वेद ८-१०)

संस्कृत वाग्देवी भाषा देवैः निर्मिता सर्वजीवैः भाष्यते। नृत्तवासने नटराजजो नानद धक्कन नवप चवरम् अस्मिन् मन्त्रे अपि भाषायाः दिव्योत्पत्तेः स्पष्टः उल्लेखः अस्ति, अ इ उ न इत्यादीनां १४ महेश्वरसूत्राणां उत्पत्तिः शिवस्य दमरुतः इति मन्यते, एषः अपि दिव्यस्य सूचकः अस्ति श्रोतं। संस्कृतभाषा ईश्वरेण निर्मिता इति कारणतः जगतः सर्वाः भाषाः तस्याः उत्पत्तिः इति मन्यन्ते । बौद्धाः पालीभाषां स्वस्य मूलभाषां मन्यन्ते स्म । जैनानां मते अर्धमागधी न केवलं मनुष्याणां भाषा अपितु सर्वेषां जीवानां मूलभाषा अस्ति । ईसाईजनाः प्राचीननियमस्य हिब्रुभाषां घोषितवन्तः, मुसलमानाः च अरबीभाषां मूलभाषा इति घोषितवन्तः जर्मनविद्वान् सुस्मिल्शः भाषायाः दिव्यमूलस्य सिद्धान्तस्य विषये कथयति यत् 'भाषा मानवनिर्मिता नास्ति, अपितु प्रत्यक्षरूपेण प्राप्ता अस्ति ईश्वरस्य दानम्। जर्मनीदेशः जर्मनभाषां मूलभाषा, देवभाषा च इति कथयति ।

समीक्षा-

देवीसिद्धान्तस्य विषये केचन आक्षेपाः सन्ति-

१- यदि भाषा ईश्वरेण दत्ता स्यात् तर्हि जन्मना एव प्राप्ता स्यात्, भाषाशिक्षणस्य आवश्यकता न स्यात्।

२-यदि वयं पश्यामः, यदि भाषा ईश्वरः दत्ता अस्ति तर्हि भिन्नभाषासु एतावत् भेदः किमर्थम्?

३-यदि भाषा ईश्वरेण निर्मिता स्यात् तर्हि सा सम्पूर्णतया विकसिता स्यात् यतोहि भाषायां विकासः, विकासः, परिवर्तनं च दृश्यन्ते, अतः सा ईश्वरेण निर्मिता इति न गणयितुं शक्यते।

**संकेतसिद्धान्तः**

सिद्धान्त-चिह्न-सिद्धान्तः निर्णय-सिद्धान्तादिनाम्ना अपि ज्ञायते । चिह्नसिद्धान्तस्य प्रवर्तकः १८ शताब्द्याः प्रसिद्धः फ्रांसीसी विचारकः रूसो इति तस्य मते प्रारम्भे पशवः इव मनुष्याः शिरः कम्पनम् इत्यादिभिः शरीरसंकेतैः स्वभावं प्रकटयन्ति स्म । क्रमेण एते संकेताः कार्यं न कृतवन्तः ततः सभा आयोजिता नामनिर्णयः च अभवत्, यदि दृष्टं तर्हि एषः सामाजिकः सम्झौता अस्ति। तदनन्तरं ध्वनिचिह्नानां उत्पत्तिः अभवत् । काव्यालंकारे-

इयन्त ईदृशा वर्णा ईदृगर्थाभिधायिनः ।

व्यवहाराय लोकस्य प्रागित्थं समयः कृतः।। काव्यालंकार ६-१३

समीक्षा-

संकेतसिद्धान्ते केचन स्पष्टाः दोषाः सन्ति-

१.यदि भाषा नासीत् तर्हि भाषा विना सभायाः आयोजनं कथं कृतम्?

२.विचारव्यञ्जनस्य भाषा का आसीत् ?

३. चर्चायै भाषां विना सभायाः आयोजनं असम्भवम्।

**धातुसिद्धान्तः**

अयं सिद्धान्तः रणन सिद्धान्तः, अनुनाद अनुकरणम्, अनुकरणसिद्धान्तः, डिंग डोंग सिद्धान्तः इत्यादिभिः नाम्ना प्रसिद्धः अस्ति । अस्य सिद्धान्तस्य प्रवर्तकः प्लेटो आसीत् । जर्मन-प्रोफेसरः हेस्

इत्यनेन तस्य व्यवस्थितीकरणं कृत्वा अग्रे नीतवान् । म्याक्स मुलरः प्रथमं एतत् सिद्धान्तं स्वपुस्तके समावेशितवान् परन्तु पश्चात् तत् निरर्थकम् इति उक्तवान् । अस्य सिद्धान्तस्य अनुसारं जगति सर्वस्य स्वकीयः शब्दः भवति । अयं विशेषः शब्दः तस्य विशेषः । यदा वयं टीन, लोह, काष्ठ, काच इत्यादीनां प्रहारं कुर्मः तदा एकः विशेषः शब्दः निर्गच्छति, सः रणान् इति कथ्यते। रणन सिद्धान्ताधारेण लोह, काष्ठ, टीन, काच इत्यादीनां भेदः क्रियते । नदी यथा 'कल-काल' अथवा 'नद-नाद' इति शब्दं करोति, तस्य आधारेण ऋत् 'रादि' इति नामकरणं जातम् । एवं दृश्यते चेत् अतः ४००-५०० मूलशब्दाः धातुः वा निर्मिताः ।

समीक्षा : अस्य सिद्धान्तस्य विचारं कृत्वा केचन दोषाः अपि प्राप्ताः -

१-भाषा न केवलं धातुतः निर्मितं भवति, तस्याः कृते प्रत्यय, उपसर्ग इत्यादयः अन्ये घटकाः अपि आवश्यकाः भवन्ति।

२-अस्य सिद्धान्तस्य विचारं कृत्वा एतस्य एतावन्तः दोषाः आसन्

३-घण्टिकायां एषः शब्दः अस्ति, न तु सर्वेषु पदार्थेषु। यदि भवन्तः तत् पश्यन्ति तर्हि तत् निरस्तं भविष्यतितदनन्तरम् अपि अयं सिद्धान्तः रोचकतायाः कारणेन लोकप्रियः अस्ति ।

४-अस्य दृढं आधारं नास्ति। एषः सिद्धान्तः कल्पनाधारितः अस्ति ।

यदि वयं अनुनाद-आधारित-सिद्धान्तस्य एतत् सिद्धान्तं, अनुकरण-सिद्धान्तं पश्यामः, तर्हि सामान्यतया आङ्ग्लभाषायां श्वापदस्य शब्दः ईव-वू-धनुष-वाह इति कथ्यते, हिन्दीभाषायां तु 'भोन्-भोन्' इति भवति । वस्तुतः अस्य सिद्धान्तस्य मूलनाम 'Onomatopoeic Theory' इति यस्य अर्थः Onomatopoeic theory इति । प्रो.मैक्स मुलरः अस्य सिद्धान्तस्य हास्यास्पदं वर्णितवान् । अस्य सिद्धान्तानुसारं पशुपक्षिणादीनां शब्दानां नामकरणेन भिन्नभिन्नवस्तूनाम् नामाङ्कनं कृतम् अस्ति ।तस्य ध्वन्यानुसारेण वस्तुनः नामकरणं भवति । यथा 'कु-कु' अर्थात् 'कोकिल', 'कान-कान' अर्थ काक तथा 'काक', 'पट-पट' अर्थ 'पटाखा', 'झार-झार' अर्थ 'झर्ना' आदि शब्दसादृश्यस्य आधारेण भाषा। यथा

गुर्राहना, कूजना, थपथपना, मूइंग, ठोकना, पट-पट, खट-खट, झाम-झाम आदि। संस्कृते नाद-नाद-आधारित-नाद-नदी इत्यादयः शब्दाः सन्ति । तथा च 'पत्' इति शब्दस्य 'पट धातु' इत्यस्य आधारे पतितव्यम् अस्ति ।

समीक्षा- अस्मिन् सिद्धान्ते अपि केचन आक्षेपाः सन्ति

१- यदि ओनोमेटोपोइया आधारः स्यात् तर्हि सर्वासु भाषासु इत्यादीनां अर्थानां कृते समानशब्दाः स्यात्न केवलं कुक्कुट-काक-जलप्रपात-निर्झार-आदिषु भेदः अस्ति किन्तु आङ्ग्ल-फ्रेञ्च-आदिषु सर्वथा भिन्नाः शब्दाः सन्ति ।

२-प्रोफेसर रेनान् इत्यनेन अस्य सिद्धान्तस्य विरोधः कृतः यत् जगतः सर्वोत्तमः प्राणी अभवत् अपि मनुष्यः स्वयमेव किमपि ध्वनिं उत्पादयितुं न शक्नोति स्म ।

३- आंशिकरूपेण स्वीकार्यत्वेऽपि एतत् मतं भाषायाः उत्पत्तिविषये अस्वीकार्यम् अस्ति ।

**आवेग-सिद्धान्तः**

एषः सिद्धान्तः मनोव्यञ्जनवादः, मनोव्यञ्जकतावादः, मनोव्यञ्जकवाचकवादः, पूः-पूहवादः इत्यादिनाम्ना प्रसिद्धः अस्ति । आवेगसिद्धान्तानुसारं सृष्टेः आरम्भे मनुष्याः विचारप्रधानाः प्राणिनः न आसन् अपितु पशवः इव भावप्रधानाः आसन् । मनुष्यः स्वस्य शोक-हर्ष-शोक-विस्मय-आदि-भावनानां अभिव्यक्तिं कर्तुं शब्दान् वा शब्दान् वा उच्चारयति स्म । क्रमेण एतेभ्यः शब्देभ्यः भाषा निर्मितवती । आनन्दे वा सुखे वा आहो, वाह इत्यादयः शब्दाः सन्ति, शोके शोके वा आह, हय, रे इत्यादयः शब्दाः सन्ति, क्रोधे आह इत्यादयः शब्दाः सन्ति। आङ्ग्लभाषायां मनोदशा सूचकाः शब्दाः सन्ति : चववी (पूः), पिम् (फि), वी (ओह) इत्यादयः। क्रमेण एतेभ्यः शब्देभ्यः भाषायाः विकासः अभवत् ।समीक्षा- अस्मिन् सिद्धान्ते केचन दोषाः सन्ति

1. आवेगशब्देषु चिन्तनस्य उल्लेखः नास्ति। यत्र भाषा विचारोन्मुखी भवति।

2- आवेगात्मकध्वनयः भाषायाः असमर्थतां सूचयन्ति, एताः भावनाः भाषाद्वारा व्यक्तुं न शक्यन्ते, अतः भाषा तेभ्यः उद्भवितुं न शक्नोति। प्रो.बेन्फी इत्यनेन एतस्य विरोधः कृतः अस्ति।

3. आवेगात्मकसिद्धान्ताः केवलं आवेगात्मकतां प्रकाशयन्ति, न तु सामान्यभावनानां अभिव्यक्तिः। अत एव ते भाषायाः मुख्यभागैः सह सम्बद्धाः न सन्ति ।

4. एषः सिद्धान्तः वैधः नास्ति यतोहि आवेगशब्दानां संख्या नगण्यम् अस्ति अतः यदि वयं पश्यामः तर्हि भाषायाः उत्पत्तिसमस्यायाः समाधानार्थं एषः सिद्धान्तः सर्वथा निरर्थकः अस्ति।असमर्थः अस्ति।

**श्रम-ध्वनि-सिद्धान्तः**

अयं सिद्धान्तः यो-हे-हो सिद्धान्तः अथवा श्रम-परिहार-सिद्धान्तः इति अपि कथ्यते । न्यरे नामकः भाषाविदः अस्य सिद्धान्तस्य प्रवर्तकः अस्ति । तस्य मते यदा मनुष्यः शारीरिकश्रमं करोति तदा तस्य श्वसनस्य वृद्धिः शीघ्रं भवति । संकोचन-विस्तारः न केवलं मांसपेशीषु अपितु स्वरतन्त्रेषु अपि वर्धते, यस्मात् कारणात् केचन ध्वनयः सहसा उद्भवन्ति यस्य कारणेन परिश्रमं कुर्वन् व्यक्तिः किञ्चित् आरामं अनुभवति यथा प्रक्षालकः वस्त्रप्रक्षालने 'हियो' वा 'छियो' वा वदति। नाविकाः श्रमात् 'यो-ही-हो' इति वदन्ति ।

समीक्षा- अयं सिद्धान्तः अपि महत्त्वपूर्णः नास्ति अस्मिन् सिद्धान्ते बहवः आक्षेपाः सन्ति-।

1- एतेषां शब्दानां भाषायां स्थानं नास्ति। अमते नाम

2- भाषायाः उत्पत्त्यर्थं सार्थकशब्दाः आवश्यकाः सन्ति एते शब्दाः शारीरिकश्रमात् जायन्ते।निरर्थकाः भवन्ति।

**इंगीतसिद्धान्तः**

डॉ. रायः अस्य सिद्धान्तस्य समर्थकः अस्ति । तदनन्तरं डार्विनः षट् असम्बद्धानां भाषाणां तुलनात्मकाध्ययनस्य आधारेण एतत् सिद्धान्तं सिद्धवान् । प्रो.रिचर्डः पुनः १९३० तमे वर्षे स्वपुस्तके

एतत् सिद्धान्तं मौखिकसूचितसिद्धान्तरूपेण प्रस्तुतवान् । अस्य मतस्य अनुसारं मनुष्यः वाक्-माध्यमेन स्वशरीर-अङ्गानाम् गतिं अनुकरणं करोति स्म,तस्मात् भाषा निर्मितवती ।

समीक्षा- अस्मिन् सिद्धान्ते अपि केचन आक्षेपाः सन्ति-

1- मानवशरीरगति-हस्त-पाद-ओष्ठ-आदि-आधारेण शब्दानां निर्माणं निरर्थकम् ।

२- अस्मिन् सिद्धान्ते आधारितसिद्धान्तानां संख्या अत्यल्पा भवति ।

3. मनुष्यः स्वस्य अनुकरणेन शब्दान् निर्मितवान्, यत् हास्यकरम् अस्ति। यदि शब्दाः परानुकरणेन रचिताः स्यात् तर्हि तत् प्रामाणिकं स्यात् ।

**सम्पर्कसिद्धान्तः**

अस्य मतस्य प्रवर्तकः जी.रवेगे नामकः प्रसिद्धः मनोवैज्ञानिकः अस्ति । अस्य मतस्य अनुसारं मनुष्यः सामाजिकः पशुः अस्ति, तस्य जन्मतः एव परस्परं सम्पर्कस्य प्रवृत्तिः भवति । यदि दृष्टं चेत् मनुष्याः यदा परस्परं सम्पर्कं कुर्वन्ति तदा अस्य आधारेण समाजस्य निर्माणं भवति । तेषु च क्षुधा, तृष्णा इत्यादयः प्रारम्भिकभावनाः अभिव्यक्तुं विविधाः प्रकाराः सम्पर्काः स्थापिताः आसन् तथा च तत्सह, स्वरध्वनयः अपि सहायकाः भवन्ति स्म, भाषा तस्यैव विकसितरूपम् अस्ति। यथा यथा सम्पर्कस्य आवश्यकता वर्धते स्म तथा तथा स्पष्टतायाः शब्दस्य च अनुभवः वर्धते स्म ।

डिटेक्टरध्वनितः सम्पर्कध्वनिः विकसितः भवति । अस्मिन् उद्घोषः, आह्वानम् इत्यादयः अन्तर्भवन्ति । क्रमेण यथा यथा विचारस्तरस्य सम्पर्कः वर्धते स्म, तथैव भाषायाः अपि विकासः अभवत् । यथा 'माता' इत्यर्थः माता, क्षीरं वा जलं वा ददातु इत्यादि। एवं दृष्टं चेत् क्रियापदं प्रथमं आगतं संज्ञा च पश्चात् आगता तथा च व्याकरणदृष्ट्या एते शब्दाः न स्युः अपितु वाक्यानि, तदनन्तरं विकासेन सह अनेकप्रकारशब्दानां संयोगेन निरन्तरसंपर्ककारणात् च लघुवाक्यानि निर्मीयन्ते स्म , भाषा विकसिता ।

समीक्षाः-

1- अन्येभ्यः सिद्धान्तेभ्यः अपेक्षया अयं सिद्धान्तः अधिकः स्वीकार्यः अस्ति।

२- अस्मिन् सिद्धान्ते केवलं उत्पत्तिविकासस्य सामान्यसिद्धान्तस्य मनोवैज्ञानिकरूपेण चर्चा कृता अस्ति ।

३- कैसिडी नामकस्य प्रसिद्धस्य विद्वान् इत्यस्य मते भाषायाः उत्पत्तिविषये अस्य सिद्धान्तस्य अनुसारमपि भाषायाः उत्पत्तिसमस्यायाः समाधानं कर्तुं न शक्यते स्म ।

4- अस्य सिद्धान्तस्य आधारः काल्पनिकः अनुमानात्मकः च अस्ति ।

**सङ्गीतसिद्धान्तः**

अस्य सिद्धान्तस्य प्रस्तावकाः डार्विन्, स्पेन्सर्, येस्पर्सन् च सन्ति । अस्य सिद्धान्तानुसारं भाषायाः उत्पत्तिः मानवसङ्गीतात् अभवत् । एषः सिद्धान्तः प्रेमसिद्धान्तः इति अपि ज्ञायते । सम्भवति स्म यत् आदिमः मनुष्यः अतीव भावुकः, सङ्गीतप्रेमी च आसीत्, सः स्वस्य विरक्तसमये किमपि गुञ्जयति स्म । तेन गुञ्जनेन कृताः शब्दाः भाषायाः उत्पत्तिः ।

परिशीलयतु-

१-आदौ मनुष्यः गुञ्जितवान् इति ठोस प्रमाणं नास्ति।

2- भाषा यदि केवलं गुञ्जनात् उत्पन्ना तर्हि केवलं अनुमानमाश्रित्यैव भवति, तादृशे परिस्थितौ सा स्वीक्रियितुं न शक्यते।

३-एषः सिद्धान्तः प्रेम्णः अधिकः सम्बद्धः अस्ति, अतः केचन जनाः प्रेमसिद्धान्तम् अपि उक्तवन्तः ।

**प्रतीक सिद्धान्तः**

आदौ यदा आदिममनुष्याः कार्यं कुर्वन्ति स्म, तदा ते ज्ञात्वा अज्ञात्वा वा स्वर-अङ्गानाम् साहाय्येन कार्य-अङ्गानाम् गतिं अनुकरणं कुर्वन्ति स्म । पश्चात् अनेन अनुकरणेन केषाञ्चन शब्दानां, शब्दसंयोगानां च उच्चारणार्थं शब्दानां प्रयोगः कृतः ।

परिशीलयतु

1. दृष्टे चेत् भाषायाः उत्पत्तिप्रश्नः अस्मिन् सिद्धान्ते अपि समाधानं न प्राप्नोति इति भासते। अद्यतनः सभ्यः मनुष्यः न एतस्य अनुकरणं करोति न च अविकसितः पुरुषः।

2-एषा प्रवृत्तिः वानरेषु अपि न दृश्यते, ये अस्माकं तथाकथिताः पूर्वजाः सन्ति।

3- प्रारम्भिक निरर्थकध्वनिभ्यः भाषा कथं विकसिता इति कुत्रापि उत्तरं न प्राप्तम्।

**समन्वयसिद्धान्तः**

अस्य सिद्धान्तस्य प्रवर्तकः समर्थकः च हेनरी स्वीट् नामकः भाषाविदः अस्ति । सः नूतनं सिद्धान्तं निर्मितवान्तस्य प्रस्तुतीकरणस्य स्थाने सर्वेषां सिद्धान्तानां संकलनं अधिकं उचितं मन्यते । भाषायाः आरम्भःअनुनादपूर्णाः, व्यञ्जकाः, प्रतीकात्मकाः च शब्दाः, चिकित्सासिद्धान्ताः च एकीकृताः आसन् । प्राध्यापकः स्वीट् इत्यनेन त्रयः प्रकाराः शब्दाः त्रयः भागाः विभक्ताः सन्ति ।

प्रथमप्रकारः शब्दाः अनुकरणात्मकाः भवन्ति । यथा - बिडालः म्याऊ-म्यावं करोति, काकः का-कां करोति, कोकिलः कु-कु-ध्वनिं करोति च । द्वितीयप्रकारः शब्दाः भावात्मकाः भावात्मकाः वा भवन्ति । यथा-अहो, ह, धिक्, हि इत्यादयः शब्दाः सन्ति। तृतीयप्रकारः शब्दाः प्रतीकात्मकाः यथा माता, पिता, भ्राता-भगिनी इत्यादयः नर्सरीशब्दाः। भाषायां प्रारम्भिकशब्दानां संख्या अतीव अधिका आसीत् अवश्यम् । एवं दृष्टं चेत् स्वीट् इत्यस्य मते भाषा व्यञ्जक-अनुकरणीय-प्रतीक-शब्देभ्यः उत्पन्ना । तदनन्तरं चिकित्साद्वारा शब्दानां विकासः अभवत् ।

समीक्षा-

१-भाषायाः उत्पत्तिसम्बद्धे अस्मिन् सिद्धान्ते भाषाविदः हेनरी स्वीट् सर्वेषां सिद्धान्तानां समन्वितं रूपं प्रस्तुतवान् अस्ति ।

२- दृष्टे चेत् अयं सिद्धान्तः अविरोधः स्वीकृतः आसीत् ।

३-हेन्री-स्वीट् इत्यस्य समन्वयसिद्धान्तः अपि भाषायाः उत्पत्तिसमस्यायाः पूर्णतया समाधानं कर्तुं न शक्तवान् ।

**प्रतिभासिद्धान्त**

प्रतिभासिद्धान्तस्य संस्थापकः आचार्य भर्तृहरिः अस्ति । वाक्यपद्यां भर्तृहरिः प्रतिभां जगतः आत्मा इति मत्वा सर्वशक्तिमान् इति वर्णितवान् ।

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।

यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥ (वाक्य० १-११८)

उपरि भाषायाः उत्पत्तिविषये ११ सिद्धान्ताः दत्ताः, परन्तु एतान् त्रयः सिद्धान्तान्, सम्पर्कसिद्धान्तः, प्रतीकसिद्धान्तः, समन्वयसिद्धान्तः च विहाय शेषसिद्धान्ताः पूर्णतया आंशिकतया च अङ्गीकृताः । ११ सिद्धान्ताः संयोजिताः अपि भाषायां १ वा २ प्रतिशतं वा शब्दानां समस्या निराकृता भवति, ६८ वा ६६ प्रतिशतं शब्दाः अस्पृष्टाः एव तिष्ठन्ति । यथा, अधोलिखितवाक्ये न कश्चित् शब्दः अस्ति यः एतेषां सिद्धान्तानाम् आधारेण समन्वितरूपेण अपि निर्मातुं शक्यते ।भाषा यादृच्छिकध्वनिसंकेतानां प्रणाली अस्ति यस्य माध्यमेन मनुष्याः परस्परं विचाराणां आदानप्रदानं कुर्वन्ति।'

एतेषु सिद्धान्तेषु केचन मौलिकाः दोषाः सन्ति-

१. एते सिद्धान्ताः कल्पयन्ति यत्-

(क) मनुष्यः प्राचीनकाले मूकः आसीत्। एषः सिद्धान्तः शारीरिक-मानसिकदृष्ट्या अपि स्वीकार्यः नास्ति ।

(ख) आदिमकाले विकासप्रक्रिया मनुष्याणाम् अपेक्षया पशुपक्षिणादिषु अधिकशीघ्रतया प्रतिबिम्बिता आसीत् । विलपः, कूजनं, शब्दं करणं च पशुपक्षिषु सहजं भवति, किन्तु मनुष्येषु न।

(ग) मनुष्ये मूलप्रेरणा वा शक्तिः वा नासीत्।

(घ) प्राचीनकाले मनुष्यः अत्यन्तं असहायः आसीत्। सः स्वस्य आवश्यकतानां पूर्तये असमर्थः आसीत् । सः किमपि वक्तुं न शक्तवान्।

२. एतेषां सर्वेषां सिद्धान्तानां माध्यमेन व्यापकं अर्थं बोधयन्तः केचन शब्दाः व्याख्यातुं शक्यन्ते, परन्तु ६६ प्रतिशतं शब्दानां उत्तरं न लभ्यते । एतेषां सिद्धान्तानां माध्यमेन सूक्ष्मार्थान् व्यञ्जयितुं न कश्चित् शब्दाः निर्मातुं शक्यन्ते ।

**बोधप्रश्नाः**

1 ध्वनिपरिवर्तनं किं ?

2 अस्य कारणानि कानि ?

3 अर्थ विज्ञानं किं ?

4 वाक्यविज्ञानं किं ?

# खण्डः ४

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- सारांशः
- बोधप्रश्नाः

## प्रस्तावना

चतुर्थे खण्डे काव्यस्य काव्यशास्त्रस्य च परिचयज्ञानात् पूर्वम् आदिकाव्यस्य आलोचनम् अत्र क्रियते। रामायणस्य महत्वम्, रामायणस्य रचनाकालाः, रामायणस्य कथासारः, पात्रचित्रणम्, तत्र प्रयुक्ताः रसाः, अलङ्काराश्च, एवं च तत्र विहितं काव्यसौन्दर्यं इत्यादि विशेषकथावष्तुनः  चर्चा दृश्यते। अपि च महाभारतस्य स्वरूपम्, तस्य रचनाकालः, प्रबन्धयोजनादि विषया वर्णिता।

## उद्देश्यम्

- काव्यस्य काव्यशास्त्रस्य च परिचयज्ञानम् सम्भवति ।
- आदिकाव्यस्य रामायणस्य महत्वम् किमीति ज्ञातुं शक्यते।
- रामायणस्य कथासारः छात्रैः ज्ञायते।
- महाभारतस्य स्वरूपम् कथमीति ज्ञातुं शक्यते।
- महाभारतस्य रचनाकालः किमीति ज्ञातुं शक्यते।

**वाल्मीकिमहर्षिः** (Valmiki Maharshi) श्रीमद्रामायणस्य कर्ता । अयम् आदिकविरित्युच्यते ।अस्य पिता प्रचेताः। रत्नाकरः इति वाल्मीकेः मूलं नाम । प्रचेतसः पुत्रः इति कारणेन प्राचेतसः इति अस्य अपरं नाम । जन्मना अयं व्याधः आसीत् ।

**रत्नाकरः वाल्मीकि**

रत्नाकरः अरण्यमार्गे गच्छतः जनान् भाययित्वा चौर्यं कृत्वा जीवति स्म । एकदा तस्मिन् मार्गे नारदमहर्षिःसमागतः । नारदमहर्षिं दृष्ट्वा चौर्यं कर्तुं रत्नाकरः तत्सकाशं गतवान् । रत्नाकरः यथार्थमवगच्छति । ज्ञानोदयः सञ्जायते ।

**शोकः श्लोकत्वमागतः**

श्रीमद्रामायणस्य रचनायां वाल्मीकिः एकदा वाल्मिकिमहर्षिः शिष्येण भारद्वाजेन सह स्नानार्थं तमसानदीं प्रति गतवान् आसीत् । स्वप्रियतमस्य वियोगेन बहु दुःखितां पक्षिणीं दृष्ट्वा आर्द्रचित्तः वाल्मीकिः झटिति तस्मै व्याधाय शापं प्रायच्छत् ।तस्य मुखात् शापः श्लोकरूपेण निःसृतः । स च -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधिः काममोहितम्॥ इति ॥

**रामायणस्य वैशिष्ट्यं**

रामायणम् आदिकाव्यमस्ति इत्येतदेव तस्य प्रथमं वैशिष्ट्यम् । अपि च सकलानां प्रमुख साहित्यग्रन्थानामपि आश्रयः च रामायणमेव । एतदुपजीव्यैव सकलभाषास्वपि अनन्तरसाहित्यानि आविर्भूतानि इति सारः । अलङ्कारादिप्रयोगेण तत्त्वशास्त्रादीनां प्रतिपादनेन भाषासारल्येन ऐतिहासिकविषयत्वेन च रामायणस्य स्थानम् अद्वितीयं वर्तते । सर्वभाषास्वपि रामायणस्य प्रभावः अद्भुतावहः अस्ति । एतावत्संख्यात्मकप्रादेशिकभाषाविवर्तनानि अन्यस्य कस्यापि ग्रन्थस्य भवितुं नार्हन्ति । वाल्मीकिरामायणम् अध्यात्मरामायणं, महारामायणं, संवृतरामायणम् अगस्त्यरामायणं,

लोमहरामायणं, मञ्जुळरामायणं सौपद्यरामायणं, सौर्यरामायणं, चान्द्ररामायणम् इत्यादि शतशः भेदाः रामायणस्य इति अस्य महत्त्वं प्रकटयति । वनवासगमनावसरे सुमित्रया लक्ष्मणं प्रति कथ्यमानः

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।'

अयोध्यामटवीं विद्धि गच्छ तात् यथा सुखम् ॥ इति

श्लोकः रामायणस्य महत्वपूर्णतां प्रदर्शयति । इदं सत्यमेव उक्तम् यत् –

वाल्मीकिगिरिसम्भूता रामाम्भोनिधिसंङ्गता ।

श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम् ॥

**रामायणस्य रचनाकालः**

अतिप्राचीनां अपि रामायणादिग्रन्थानाम् रचनाकालः एषः एव इति प्रायेण वक्तुं भाषाविज्ञानद्वारेण शक्यते । वस्तुतः एतस्मिन् वर्षे एतस्मिन् मासे एतस्मिन् दिने एतस्मिन समये एषः ग्रन्थः रचितः इति कथनं अशक्यं । तथापि एतादृशग्रन्थानां रचनाकालविषये पण्डिताः भिन्नं भिन्नं मतं प्रकटयन्ति । तदनुसृत्य रामायणस्यापि कालस्य सामान्यनिर्णयः कृतः अस्ति ।।

वाल्मीकिरामायणमिति अस्माभि: उपलब्धो ग्रन्थ: वास्तव्येन भाषाविज्ञानेन संशोधितं अत:परं विदुषां एष: प्रत्ययो यद् तद्ग्रन्थ: प्रायेण वाल्मीकिना रचितोपि तस्य विभिन्ना: रचयितार: स्पष्टं अभिज्ञातुम् शक्यन्ते । बालकाण्डम् तथा उत्तरकाण्डम् वाल्मीकिना न रचिते स्त: यत: तयो: शब्दविन्यास: साहित्यविन्यासश्च मध्यवर्तिभ्य: पञ्चभ्य: काण्डेभ्यो विभिन्नौ स्त: तत्परं कतिपयानि वृत्तान्यपि वैपरीत्येन वर्णितान्यपि सन्ति ।।

रामायणे महाभारतवर्णितस्य कस्यापि कथापात्रस्य नाम न श्रूयते । महाभारते तु रामस्य कथा वर्णिता अस्ति । महाभारतस्य सप्तमपर्वणि लङ्काकाण्डगतं पद्यद्वयं प्राप्तमस्ति । अतः रामायणं महाभारतात् प्राचीनं भवति । रामायणस्य बौद्धसाहित्यस्य च सम्बन्धः दृश्यते । रामायणीया कथा

किञ्चित् परिवर्तनेन दशरथजातकनाम्ना पालिभाषया रचिता अस्ति । जातककथासु रामायणस्थलसाम्यम् अस्त्येव । बौद्धसाहित्यपण्डितः सिलवेनलेविमहाशयः स्पष्टयति यत् सद्धर्ममृत्युपस्थानस्य बौद्धग्रन्थस्य मूलम् अवश्यं वाल्मीकिरामायणम् इति तत्र विद्यमानं जम्बूद्वीपवर्णनं रामायणीयदिग्वर्णनस्य सदृशमस्ति इति । याकोबिमहाशयः भाषाविज्ञानदृष्ट्या बौद्धकालात् पूर्वमेव रामायणस्य कालः इति कथयति । एतैः सर्वैः अपि प्रमाणैः रामायणस्य बौद्धकालिकात् पूर्वत्वं सिद्ध्यति । रामायणे कोसलराजधानी अयोध्या इति प्रतिपादिता अस्ति । बौद्धैः यवनैः पतञ्जलिः कोसलराजधान्याः साकेतः इति नाम उच्यते । अतः साकेतनामकरणात् पूर्वमेव रामायणस्य रचनाकालः इति ज्ञायते ॥

पाटलीपुत्रस्य प्रतिष्ठापनं अजातशत्रुणा ई.पू. ५०० समये कृतम् । रामायणे पाटलीपुत्रस्य नाम नास्ति । पाणिनीयव्याकरणनियमाः सर्वे रामायणे न अनुसृताः दृश्यन्ते । एतादृशैः अनेकैः कारणैः रामायणस्य रचनाकालः ई.पू. ५०० इति सिद्धम् ॥

**सारांशः**

रामायणकथानायकः श्रीरामः हिन्दुभिः पूज्यमानेषु देवेषु अन्यतमः । रामः यत्र वसति स्म, यत्र यत्र प्रवासं कृतवान्, तादृशस्थानानि अद्य पवित्रक्षेत्राणि अभवन् । सनातनधर्मानुयायिनां तु रामायणकथायामतीव श्रद्धा वर्तते । पूर्णरामायणम् अथवा रामायणास्य केचन भागाः श्रद्धया पठ्यन्ते अथवा श्रूयन्ते चेत् यः पठति श्रृणोति वा सः महापापादपि प्रमुच्यते इति अनेके विश्वसन्ति । धार्मिकाणामभिप्राये रामः त्रिमूर्तिषु अन्यतमस्य विष्णोः एव अवतारः । धर्मसंस्थापनार्थाय एव भुवमवतीर्णः श्रीरामः ।तस्य दैवांशत्वं, तस्य जन्म, रावणविषये दन्तकथाः ईदृशाः पौराणिकांशानां बहुभागाः अनयोः अध्याययोः एव द्रष्टुं शक्यन्ते ।

**रामायणे मुख्यपात्राणि**

रामः -रामायणकथानायकः श्रीरामः । सः अवतारपुरुषः इति रामायणे चित्रितः। श्रीरामः अयोध्याधिपस्य दशरथस्य अत्यन्तं प्रीतिपात्रं ज्येष्ठपुत्रः । अयोध्याप्रजाभ्यः अपि अत्यन्तं प्रीतिपात्रं

श्रीरामः । एषः सद्गुणानां साकाररूपः (मूर्तरूपः)आसीत्। दशरथस्य तिसृषु पत्नीषु अन्यतमा कैकेयी दशरथेन दत्तेन वरद्वारा रामं वनं प्रेषयति । रामोऽपि राज्याभिषेकं विहाय वनगमनाय सिद्धः भवति । यदा वनवासे भवति तदैव राक्षसं रावणं मारयति ।

सीता -श्रीरामस्य पत्नी सीता जनकमहाराजस्य पुत्री। सीता सच्चारित्र्यवती आसीत् । सा राममनुसृत्य वनं गच्छति । वने रावणेनापहृता भवति । रावणः सीतां लङ्कायां रहस्यस्थाने स्थापयति । कतिचनदिनानन्तरं रामः रावणं मारयित्वा सीतां बन्धमुक्तां कृत्वा अयोध्यामानयति ।

हनुमान्- हनुमान् इति प्रसिद्धः कश्चन कपिः (वानरः) । अयं वानरः किष्किन्धासाम्राज्ये वसति। एषः श्रीरामस्य परमभक्तः आसीत् ।(श्रीरामे हनूमतः पराभक्तिः) महासमुद्रमुल्लङ्घ्य सीतामन्विष्य रामं निवेदयति । तदनन्तरं लङ्कायाः सीतामानेतुं हनूमान् रामस्य बहु साहाय्यं करोति ।

लक्ष्मणः-श्रीरामस्य अनुजः लक्ष्मणः । यदा रामः वनगमनाय सन्नद्धः तदा राममनुगच्छत्येषः । वनवाससन्दर्भे लक्ष्मणः सीतारामयोः अपरिमितां सेवां करोति । रावणेन प्रेरितः मारीचः नाम राक्षसः मायामृगरूपेण आश्रमसमीपे इतस्ततः भ्रमति । तेन मृगेण आकृष्टा सीता तमपेक्षते । प्रथमं रामः तमानेतुं गतः । अल्पसमयानन्तरं लक्ष्मणोऽपि राममन्विषन् उटजात् निरगच्छत् । तदा एव रावणः सीतामपहरति ।

रावणः - लङ्काधिपः रावणः सः ब्रह्माणमधिकृत्य दशसहस्रं वर्षाणि यावत् तपः आचरति। विशिष्टं वरमेकं प्राप्नोति च यत् देवताभ्यः अथवा अन्याभ्यः शक्तिभ्यः मरणं न प्राप्नुयादिति । रावणस्य दशशिरांसि, विंशतिहस्ताः, ब्रह्मणः वरकारणात् चिरंजीवित्वं, एवं सर्वस्मात् कारणात् रावणः लोककण्टकः अभवत् । दुष्टतया विजृम्भमाणस्य रावणस्य संहारं कर्तुं रामः भूलोके अवततार ।

दशरथः अयोध्याधिपः दशरथः । तस्य तिस्रः पत्न्यः आसन् । प्रथमा कौसल्या, द्वितीया सुमित्रा, तृतीया कैकेयी च । श्रीरामः कौसल्यायाः पुत्रः लक्ष्मणः शत्रुघ्नः च सुमित्रायाः यमलौ पुत्रौ, कैकेय्याश्च

पुत्रः भरतः । दशरथस्य अत्यन्तं प्रीतिपात्रं कैकेयी आसीत् । सा कैकेयी दशरथात् वरद्वयं प्राप्नोत् तदनुसारं सा " रामः चतुर्दशवर्षाणि वनवासं कुर्यात्, भरतश्च अयोध्यायाः राजा भवेत् " इति अपेक्षितवती । पुत्रेण रामेण वियुक्तः दशरथः पुत्रशोकात मरणं प्राप्नोत् ।

भरतः - दशरथस्य द्वितीयः पुत्रः भरतः । सीतारामलक्ष्मणाः यदा वनं प्रस्थितवन्तः तदा भरतः अयोध्यायां नासीत् । परन्तु रामस्य वनगमनात् दुःखं सोढुमशक्तः दशरथः मृतः अभवत् । समस्तघटनानां मूलकारणं कैकेयी एव इति ज्ञात्वा भरतः कैकेय्यै क्रुध्यति । अनुक्षणं रामम् अन्वेष्टुं निर्गच्छति । पितृवाक्यपरिपालनार्थं वनं गतः रामः भरतेन निवेदितः चेदपि अयोध्यां प्रति आगमनं नाङ्गीकरोति । तदा भरतः रामस्य पादुकाद्वयं शिरसि संस्थाप्य अयोध्यामागच्छति । अयोध्यायाः सिंहासने श्रीरामस्य पादुके संस्थाप्य रामस्य परतया राज्यभारं निर्वहति भरतः ।

विश्वामित्रः -ब्रह्मर्षिः विश्वामित्रः अरण्ये हवनादिसत्कार्यकरणसन्दर्भे पीडयतः राक्षसान् संहर्तुं रामलक्ष्मणौ वनं प्रति नयति । कार्यं समाप्य ततः तौ मिथिलानगरं नयति । तत्र जनकमहाराजः सीतायाः स्वयंवरम् आयोजितवानासीत् । तत्र शिवधनुः भग्नं कृत्वा रामः सीतां वृणोति।

**महाभारतम्**

महर्षिणा वेदव्यासेन विरचितो बहुप्रसिद्धो महाकाव्यं विद्यते। अस्मिन् ग्रन्थे कौरव-पाण्डवानां महायुद्धं मुख्य-विषयरूपेण वर्णितमस्ति। मानवजीवनस्य धर्म-अर्थ-काम-मोक्ष-रूपाः समस्तपुरुषार्थाः अत्र विशालग्रन्थे सन्निवेशिताः। अस्य महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता विद्यते। भगवता कृष्णेन मोहग्रस्तम् अर्जुनं प्रति ज्ञान-कर्म-भक्ति-विषयकः उपदेशो गीतायां प्रदत्तः। अस्यां गीतायामपि अष्टादश अध्यायाः सन्ति। मानव-जीवनस्य विविधविषयाः अत्र समीचीनतया प्रतिपादिताः सन्ति। इयं विश्वजनीन-कृतिः कालजयिनी चिरन्तनी एव।

**महाभारतस्य रचनाकालः नामकरणञ्च**

महाभारतग्रन्थः त्रिभिः सवंत्सरैः विरचितं च -

त्रिभिर्वर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः।

महाभारतमाख्यानं कृतवानिदमद्भुतम्॥

इदं प्रायः सर्वे भारतीया विद्वांसो मन्यन्ते यत् महाभारतं प्राग् जयनाम्ना ततो भारतनाम्ना ततः परतश्च महाभारतनाम्ना प्रसिद्धम् । सूक्ष्मेक्षिकयाऽवलोकनेन ज्ञायते यत् - महाभारतस्य प्रगते चरणत्रयं विद्यते।

प्रथमे चरणे - जयनामकं काव्यमेतत् ८८०० श्लोकपरिमितं व्यासकृतं धर्मचर्चाम् आश्रित्य महर्षि व्यासेन स्वशिष्याय वैशम्पायनाय श्रावितमभूत्।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।

देवीं सरस्वतीं चैव ततो जयमुदीरयेत्।।

प्रत्येकस्य अध्यायस्य आदौ विद्यमानः अयं प्रसिद्धः श्लोकः इदं निरूपयति ।

द्वितीये चरणे - भारतनामकं महाकाव्यमेतत् वैशम्पायनकृतं २४ सहस्रश्लोकपरिमितं (चतुर्विंशतिसाहस्री) वैशम्पायनेन अर्जुनस्य प्रपौत्राय जनमेजयाय नागयज्ञे श्रावितमभूत्।

तृतीये चरणे - महाभारतनामकं महाकव्यमेतत् लोमहर्षपुत्रेण सौतिकेन रचितं - एकलक्षश्लोकपरिमितं नैमिषारण्ये यज्ञकाले शौनकादिभ्यः ऋषिभ्यः श्रावितमभूत्। एवञ्च आख्यानमिदं त्रिभिर्वक्तृभिः महर्षिभिः विभिन्नश्रोतृभ्यः श्रावितम्।

महाभारतस्य अन्ते विद्यमानेन श्लोकेन इदं प्रमाणितं भवति -

उक्तं शतसहस्राणां श्लोकानामिदमुत्तमम्।

अस्य ग्रन्थस्य नूतनतमस्य रूपस्य नाम शतसाहस्री संहिता अपि अस्ति।

**महाभारतस्य रचनाकालः**

सम्प्रत्युपलभ्यमानं महाभारतं मूलमहाभारतात् परतो बहुषु शतकेषु व्यतीतेष्वेव निर्मितं स्यादतो मूलमहाभारतस्य जयाभिधानस्य वर्तमानमहाभारतात् पूर्वकालिकत्वं निश्चितम् । अत्र वर्तमानमहाभारतस्य रचनाकालसम्बन्धे विचारणीयमस्ति, तत्र –

१. ख्रीष्टैकादशशतके जातेन क्षेमेन्द्रेण कृतो भारतमञ्जरीनामा ग्रन्थः कथायां वर्तमानमहाभारतमनुहरतीति वर्तमानमहाभारतस्य एकादशशतकपूर्वकालिकत्वं सर्वथा सिद्धम् ।

२. अष्टमशतकोत्तरार्धे जातः आद्यशङ्कराचार्यः महाभारतं स्त्रीभिः धर्मज्ञानाय अध्येयत्वेन आदिशन्ति, तेन महाभारतस्य ततः पूर्वकालिकत्वं सिद्धम् ।

३. अष्टमशतकोत्पन्नाः कुमारिलभट्टाः महाभारतस्य बहूनि पर्वाणि स्मरन्ति ।

४. सप्तमशतकोत्पन्ना बाणसुबन्धुप्रभृतयः कवयो महाभारतस्य अष्टादश पर्वाणि हरिवंशं च स्मरन्ति ।

५. कम्बोडियानामके भारतस्य प्राचीनोपनिवेशे षष्ठशतकसमीपे उत्कीर्णात् शिलालेखात् ज्ञायते यत् तत्रत्याय कस्मैचिन्मन्दिराय रामायणमहाभारतग्रन्थौ भारतेन प्रहितौ । तत्कथाप्रबन्धोऽपि भारतेन कृतः ।

६. यवबालिप्रभृतिषु द्वीपेषु षष्ठशतके महाभारतमवर्त्तत, ततोऽपि पूर्वं तिब्बतभाषायां महाभारतस्यानुवादो जातः ।

७. चतुर्थपञ्चमशतकलिखितेषु दानपत्रकेषु स्मृतिरूपेण महाभारतवचनानि निर्दिष्टानि दृष्टानि ।

८. ४६२ ख्रीष्टोत्की-एकत्र शिलालेखे पाराशर्यव्यासस्य लक्षश्लोकात्मकस्य महाभारतप्रणेतृत्वम् उल्लिखति ।

९. सीरियादेशभाषायाम् उपलभ्यमानस्य शान्तिपर्वाध्यायत्रयस्य साक्ष्येण हर्टलमहोदयः प्रमाणयति यत् प्रचलितं महाभारतम् ई.पू. पञ्चमशतकनिबद्धात् महाभारतात् न भिद्यते इति ।

१०. डयोन क्राइसोस्तोम (Dion Chyrsostom) महोदयस्य साक्ष्येण प्रतीयते यत् ५० ख्रीष्टाब्दकाले लक्षपद्यात्मकं महाभारतं दक्षिणपथे लब्धप्रचारमासीत् इति ।

११. ख्रिष्टप्रथमशतके स्थितेन वज्रसूचीकृत्ताश्वघोषेण हरिवंशस्थ पद्यमेकमुद्धतम् । एभिः सर्वैः समुदितैरेतत् सिद्धं यत् ख्रीष्टशतकप्रारम्भे महाभारतम् अवश्यम् अवर्तत । अपि च –

(क) पाणिनिः महाभारतं जानाति स्मेति डल्हौन (Dalhmann) साक्ष्येण प्रतीयते ।

(ख) खीष्टपूर्वपञ्चमशतकप्रणीते आश्वलायनगृह्यसूत्रे महाभारतस्य उल्लेखो दृश्यते ।

(ग) ४०० ई.पू समये निर्मिते बौधायनधर्मसूत्रे महाभारतस्योल्लेखो दृश्यते ।

(घ) बौधायनगृह्यसूत्रे महाभारतीयं विष्णुसहस्रनामोद्ध्रियते स्म ।

(ङ) महाभारतीयशान्तिपर्वणि विष्णोर्दशावतारगणनाकालेबुद्धस्य नाम नायाति ।

(च) मेगास्थनीजप्रणीते भारतवर्णने याः कथाः ता महाभारतात् एव प्राप्ताः ।

(छ) ब्रह्म सर्वदेवज्येष्ठतया महाभारते प्रतिपादितः । पालिभाषासाहित्येन ज्ञायते यद् ब्रह्मणो ज्यैष्ठत्वं खीष्टपूर्वपञ्चमशतकात् प्रागेव प्ररूढप्रचारमासीत् ।

(ज) ज्यौतिषप्रमाणैः अपि कतिपये विद्वांसः कल्पयन्ति यत् वर्त्तमानं महाभारतम् ५०० ई.पू. समयात् प्रागेव निर्मितं न ततः परम् ।

अतः सर्वसमीक्षया महाभारतम् ५०० ई.पू. समयतः परतो न निर्मितं किन्तु कदाचित् पूर्वमेव निर्मितमिति प्रतीयते ।

**महाभारतस्यादरः**

रामायणस्य तुलनायां यद्यपि महाभारतस्य प्रचारः अल्पः तथापि महत्त्वदृष्ट्या महाभारतं विश्वस्य कस्मादपि ग्रन्थान्न हीयते । महाभारतं तदानीन्तनभारतीयसमाजनीतिप्रभृतिज्ञातव्यं बोधयति, महाभारतं तदानीन्तनीं भारतीयां सभ्यतां प्रकाशयति । प्रमाणग्रन्थतयैवास्य पञ्चमवेदसंज्ञा जाता । यथा रामायणाधारेण बहवो ग्रन्था अरच्यन्त तथैव महाभारताधारेणापि । एतत् सर्वमस्य ग्रन्थस्य महत्त्वे साक्षिभूतम् ।

**महाभारतस्य विभागाः**

महाभारतम् अष्टादशसु पर्वसु विभक्तं वर्त्तते, तस्मिंश्च आदि-सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-अश्वमेध-आश्रमवासि-महाप्रास्थानिक – स्वर्गारोहणपर्वणि सन्ति ।

अनुषङ्गतः शकुन्तलोपाख्यान –मत्स्योपाख्यान –रामोपाख्यान-शिबिकथा-सावित्रीकथा-नलोपाख्यानादीनि वर्णितानि । युद्धवर्णनमात्रं न व्यासस्य लक्ष्यमपि तु भौतिकजीवनस्यासारतां प्रकाश्य प्राणिनां मोक्षमार्गे प्रवर्त्तनमेव व्यासस्य महाभारतप्रणयने उद्देश्यमासीत्, अत एवात्र शान्तो रसः प्रधानभूतः वीरस्तु रसोऽङ्गभावं गतः ।

| क्र.सं | पर्व | अध्यायाः | श्लोकाः |
|---|---|---|---|
| १ | आदिपर्व | २२७ | ८८८४ |
| २ | सभापर्व | ७८ | २५५१ |
| ३ | वनपर्व | २६९ | ११६६४ |
| ४ | विराटपर्व | ६७ | २०५० |
| ५ | उद्योगपर्व | १८६ | ६६९८ |
| ६ | भीष्मपर्व | ११७ | ५८८४ |
| ७ | द्रोणपर्व | १७० | ८९०९ |
| ८ | कर्णपर्व | ६९ | ४९६४ |
| ९ | शल्यपर्व | ५९ | ३२२० |
| १० | सौप्तिकपर्व | १८ | ८७० |
| ११ | स्त्रीपर्व | २७ | ७७५ |
| १२ | शान्तिपर्व | ३३९ | ४७३२ |
| १३ | अनुशासनपर्व | १४६ | ८००० |

| | | | |
|---|---|---|---|
| १४ | अश्वमेधपर्व | १०३ | ३३२० |
| १५ | आश्रमवासिकपर्व | ४२ | १५०६ |
| १६ | मौसलपर्व | ८ | ३२० |
| १७ | महाप्रस्थानिकपर्व | ३ | ३२० |
| १८ | स्वर्गारोहणपर्व | ५ | २०१ |
| १९ | हरिवंशः | ३ | १२००० |

हरिवंशोनाम खिलपर्वापि योजयित्वा आहत्य १९३६ अध्यायाः १६८३६ श्लोकाश्च सन्ति महाभारते।अस्मिन् महाभारते एव विदुरनीतिः सनत्सुजातीयम् भगवद्गीता अनुगीत चेति चत्वारः तत्त्वोपदेशग्रन्थाः भवन्ति। विदुरनीतिः उद्योगपर्वणि ३३ तः ४० अध्यायपर्यन्तम् भवति। सनत्सुजातीयं उद्योगपर्वणि ४९ तः ४६, पर्यन्तम् भगवद्गीता भीष्मपर्वणि २५ तः ४२ पर्यन्तम् अनुगीता अश्वमोधीकपर्वणि १६ तः५१ पर्यन्तम् च वर्तते।

**महाभारतस्य वैशिष्ट्यम्**

व्यासस्य कृतिरियं सर्वैरितिहास इत्युच्यते यतोऽत्र वीराणां पुण्या गाथा वर्णिता । अयं ग्रन्थो धार्मिकग्रन्थो येन लोकः स्वकल्याणं गवेषयति । अत्रैव ग्रन्थे गीतारत्नं विद्यते या दुग्धेव प्रतीयतेऽनवरतं दुह्यमानाऽपि । गीताग्रन्थस्यादरो महाभारतस्यैव विशिष्टतां प्रमाणयति । स्वयमेव व्यासेन महाभारतस्य प्रशंसायां यदुक्तं तदक्षरशः सत्यम् –

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।

न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः॥

श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यत्र रोचते ।

पुंस्कोकिलागरं श्रुत्वा रुक्षा ध्वंक्षस्य वागिव ॥

श्रीवेदव्यासस्य महत्वाकाङ्क्षेयं यद् धर्मार्थ-काम-मोक्ष-विषयकम् अखिलमपि जिज्ञासितं तथ्यम् अत्रैव लभेत, न च किञ्चिद् उच्छिष्येत इति । अतैव उच्यते -

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभम्।

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥

महनीयोऽयं ग्रन्थः यथा वपुषा विशालः तथैव भावगाम्भीर्येण अर्थगौरवेण च। अतैव उच्यते - महत्वाद् भारवत्वाच्च महाभारतमुच्यते। महाभारतं विरचय्य श्रीव्यासः 'शिष्येभ्यः कथम् अध्यापयामि' इति यथा चिन्तामग्नः आसीत् तदा तस्य व्यथां ज्ञात्वा स्वयं लोकगुरुः भगवान् ब्रह्मा तस्य प्रीत्यर्थं लोकानां हितकाम्यया च तत्र आगच्छत्। यथाविधि तस्योपचारं कृत्वा स्वयं श्रीव्यासः स्वग्रन्थविषयेऽवदत् - 'भगवान्! मया इदं परमपूज्यं काव्यं कृतम्। अस्मिन् काव्ये वेदरहस्यं साङ्गोपनिषदां विषयः च विस्तारेण वर्णितः । इतिहासाः - पुराणानि - भूतं -भव्यं - भविष्यं, जरा-मृत्यु-भय-व्याधि-भावाभावः, चातुर्वर्ण्यविधानं वर्ण्यधर्माः, पृथिवी - चन्द्रः - सूर्यः - तारागणः ग्रहप्रमाणाः, सत्य-त्रेता-द्वापर-कलियुगाः, ऋग्-यजुस्-सामानि सर्वमपि वर्णितम्। तीर्थानां पुण्यक्षेत्राणां च कीर्तनं, नदी-वन-पर्वत-सागरादीनां वर्णनं, सर्वमपि प्रतिपादितं विद्यते अस्मिन् ग्रन्थे । परन्तु एतस्य ग्रन्थस्य कोऽपि लेखकः भुवि न विद्यते। ब्रह्मा अपि प्रत्युत्तरे - 'अन्य कोऽपि अस्मात् श्रेष्ठतरं काव्यं लेखितुं न समर्थो भवति । लेखनार्थं श्रीगणेशं स्मर' इति उक्त्वा स्वधाम अगच्छत् । एवं महाभारतं श्रीव्यासेन प्रणीतं, श्रीगणेशेन लिखितम्।

**बोधप्रश्नाः**

1 वाल्मीकेः परिचयः ?

2 रामायणस्य महत्वं ?

3 रामायणे रसालंकाराश्च ?

4 महाभारतस्य स्वरूपं ?

# खण्डः ५

**पाठरचना**

- प्रस्तावना
- उद्देश्यम्
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः

**प्रस्तावना**

अन्तिमखण्डे काव्यस्य लक्षणम्, तस्य च भेदाः निरूपिताः। प्रभेदक्रमेण गद्यकाव्यस्य स्वरूपम् अस्मिन् वर्णितम् वर्तते। महाकाव्यस्य लक्षणं तेषां नामानि अत्र चर्चा क्रीयते विषयवस्तुना सहितम्। संस्कृतसाहित्ये विद्यमानानां कविसमूहानां नामानि तेषां कृतिसंभारः अस्मिन् खण्डे विशिष्टक्रमेण प्रदीयते।

**उद्देश्यम्**

- काव्यस्य लक्षणम्, तस्य च भेदाः इति ज्ञानं भवति ।
- महाकाव्यस्य लक्षणं किमीति छात्राणां ज्ञानं भवति ।
- कालिदासस्य परिचयः छात्रैः प्राप्यन्ते ।
- भासस्य नाटकचक्रं किमीति छात्रैः ज्ञायते ।

- जयदेवस्य काव्य शैलि किमीति छात्रानां ज्ञानं भवति ।

**काव्यम्**

काव्यं इत्येतत् साहित्यप्रकारः अस्ति । कवेः कर्म काव्यम् । कविः तु दार्शनिकः । काव्यस्य परिभाषाः अनेकाः सन्ति, किन्तु सर्वमान्या मुख्या परिभाषास्ति वाक्यं रसात्मकं काव्यम् इति । अर्थात् येन वाक्येन रसोत्पत्तिः भवति तत् काव्यम् इति कथ्यते। रस, छन्दोभिः अलङ्कारैः युक्तं काव्यम् आनन्दोत्पत्तिं करोति। रमणीयार्थप्रतिपदकं वाक्यं काव्यम् इति कथ्यते । कवितायाः (Kavita) परिभाषाऽनेकाः सन्ति , किन्तु सर्वमान्या मुख्या परिभाषास्ति वाक्यं रसात्मकं काव्यम् अर्थात् येन वाक्येन रसोत्पत्तिः भवति तत् वाक्यं कविता इति कथ्यते। रस,छन्द।छन्दालंकारैः युक्ता कविता आनन्दोत्पत्तिं करोति। महात्मना तुलसीदासेन उक्तं यत् ---कीरति भणिति भूति भलि सोई । सुरसरि सम सब कर हित होई।। अर्थात् येन काव्येन सर्वेषां जनानां हितं भवति तत् काव्यं साहित्यं कथ्यते। आनन्दो वै काव्यम् अर्थात् आनन्दः एव कवितायाः प्रथमं लक्षणमस्ति।

**काव्यग्रन्थानां प्रकाराः**

काव्यशास्त्रप्रणाल्यां मुख्यतः षड् विधा ग्रन्था दृश्यन्ते। काव्यसर्वाङ्गविवेचकाः, कव्यालङ्कारमात्रविवेचकाः, ध्वनिसम्बद्धाः (समर्थकाः, विरोधिनः), रससम्बद्धाः, नाट्यसम्बद्धाः, विचारग्रन्थाः च।

दण्डिनः काव्यादर्शः, वामनस्य काव्यालङ्कारसूत्रवृत्तिः, रुद्रटस्य काव्यालङ्कारः, भोजस्य सरस्वतीकण्ठाभरणं, कुन्तकस्य वक्रोक्तिजीवितं, मम्मटस्य काव्यप्रकाशः, हेमचन्द्रस्य काव्यनुशासनम्, वाग्भटस्य वाग्भटालङ्कारः, वाग्भटस्य काव्यानुशासनम्, मलयजपण्डितस्य साहित्यसारः, जयदेवस्य चन्द्रालोकः, विश्वनाथस्य साहित्यदर्पणः, जगन्नाथस्य रसगङ्गाधरः काव्यसर्वाङ्गविवेचकाः ।

उद्भटस्य काव्यालङ्कारसङ्ग्रहः, अजितसेनस्य अलङ्कारचूडामणिः, राजराजस्य राजराजीयं, धर्मदासस्य विदग्धमुखमण्डनं, शोभाकरस्य अलङ्काररत्नाकरः, अप्पदीक्षितस्य कुवलयानन्दश्चित्रमीमांसा च विश्वेश्वरस्य अलङ्कारकौस्तुभः अलङ्कारप्रदीपः, अलङ्कारमुक्तावली च, नरसिंहाचार्यस्य अलङ्कारेन्द्रशेखरः, केशवस्य अलङ्कारशेखरश्चालङ्कारमात्रसम्बद्धग्रन्थाः।

आनन्दवर्धनस्य ध्वन्यालोकः, पुञ्जराजस्य ध्वनिप्रदीपः, मम्मटस्य शब्दव्यापारविचारः, अप्पयदीक्षितस्य वृत्तिवार्तिकञ्चेति ध्वनिसम्बद्धग्रन्थाः । भट्टनायकस्य हृदयदर्पणः, महिमभट्टस्य व्यक्तिविवेकः, मुकुलभट्टस्याभिधावृत्तिभर्तृका च ध्वनिपरिहारग्रन्थाः ।

रुद्रभट्टस्य शृङ्गारतिलकं, भानुदत्तस्य रसमञ्जरी, रसतरङ्गिणी च, शिवरामत्रिपाठिनो रसरत्नहारश्च रसमात्रसम्बद्धग्रन्थाः।

भरतस्य नाट्यशास्त्रं, धनञ्जयस्य दशरूपकं, सागरनन्दिनो नाटकलक्षणरत्नकोशः, रामचन्द्रगुणचन्द्रयोर्नाटयदर्पणः, विद्यानाथस्य प्रताप्ररुद्रयशोभूषणं, शारदातनयस्य भावप्रकाशनम्, रूपगोस्वामिनो नाटकचन्द्रिका च नाट्यग्रन्थाः ।

रुद्रटस्य सहृदयलीला, क्षेमेन्द्रस्य कविकण्ठाभरणं, सुवृत्ततिलकमौचित्यविचारचर्चा च, राजशेखरस्य काव्यमीमांसा, अरिसिंहामरचन्द्रयोः काव्यकल्पलता, देवेश्वरस्य कविकल्पलता, विश्वेश्वरस्य कवीन्द्रकणभरणं रामानन्दस्य रसिकजीवनं च विचारग्रन्थाः।

**सम्प्रदायाः**

रस-अलङ्कार-रीति-ध्वनि-वक्रोक्ति-औचित्याख्याः षट् काव्यशास्त्रसम्प्रदायाः क्रमेण भरत-भामह-वामन-आनन्दवर्धन-कुन्तक-क्षेमेन्द्रसमर्थिताः । तत्र रससम्प्रदायो हि काव्ये इतरतत्त्वोपेक्षयाऽपि रससिद्धिं वाञ्छति । "वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इत्यस्य मार्गः । यद्यपि कमनीयमपि वपुः श्वित्रेणैकेन दुर्भगं भवति तथापि गुणसन्निपाते स्वल्पो दोषो न सह्यानाय भवति । सत्यपि सौन्दर्ये

सर्वेषामेवाङ्गानां संयुक्तशक्तौ यथा तत्र वदनस्यैव प्रधान्यं भवति तथैव काव्यं हि रसगुणालङ्काररीतिप्रभृतिसंस्कृतशब्दार्थयोरेव भवति, किन्तु तत्र जीवतत्त्वं तु रस एव । गुणा हि रसस्यैव धर्माः, अलङ्कारा अपि तस्यैव शोभातिशयहेतवः । रीतयोऽपि तस्यैव साधिकाः।

**काव्यभेदः-**

मुख्यतः अपेक्षितमस्ति, परं कुत्रापि काव्ये यदि अलङ्कृतिः स्फुटा नास्ति शब्दार्थयुगले, तत्रापि नहि काव्यताहानिः । एतस्य उदाहरणमपि प्रस्तुतम्, तत्र 'यः कौमारहरः' इत्यादौ पद्ये स्फुटालङ्कारविरहेऽपि विप्रलम्भश्रृङ्गारस्य प्राधान्येन अभिव्यक्तत्या सहृदयहृदयाह्लादकत्वात् सुतरां काव्यता वरीवर्ति। स च रसः अलङ्कारो भवितुं नार्हति, प्रधानो न भवति अलङ्कारः, अप्राधान्ये एव अलङ्कारता। एवं काव्यसामान्यलक्षणस्य विवेचनेनैव काव्यस्य अनेकता अभिव्यक्ता। अर्थात् कुत्रापि अलङ्कारः स्फुटः अन्यत्र अस्फुटः, क्वचन व्यङ्ग्यार्थप्रधानः, अन्यत्र अप्रधानः, एवं कविकर्म काव्यम् अनेकरूपेण भिद्यते ।

- उत्तमम् (ध्वनिकाव्यम्)
- मध्यमम् ( गुणीभूत- शब्दचित्रम् अर्थचित्रम् व्यङ्ग्यकाव्यम्)
- अधमम्

काव्यप्रकाशकारस्य मम्मटभट्टस्य आदर्शभूतः आचार्यः ध्वन्यालोककर्ता आनन्दवर्धनः अस्ति। ध्वनिकारो ध्वनिं काव्यविशेषं कथयति ( ध्वन्यालोक - १-१३) । काव्यसामान्यं पृथग् रूपेण तेन नहि लक्षितम् वृत्तिग्रन्थेन केवलं तत् सङ्केतितं ललितोचितसन्निवेशचारुकाव्यशरीरमिति (ध्वन्या-१-२ वृत्तिग्रन्थः) एवं ललितशब्दस्य उचितार्थस्य, अनयोः सम्यङ्गिनवेशेन संघटनेन यत् चारु-मनोहारि

(शरीरम् ) तत् काव्यमिति । परं काव्यप्रकाशकारस्य यत् काव्यलक्षणम्तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापीति । एतत् काव्यशरीरलक्षणं काव्यसामान्यलक्षणम्। काव्यविशेषलक्षणं तु काव्यप्रकाशकर्ता काव्यभेदलक्षणद्वारा प्रकाशयति । यद् ध्वनिकारस्य काव्यविशेषलक्षणं ध्वनिलक्षणम्, तत् काव्यप्रकाशकारस्य काव्यप्रथमप्रकारलक्षणम्-ध्वनिलक्षणम्।

अत्र काव्यमार्गे न केवलं शब्दः न च केवलम् अर्थः, अपितु उभावपि शब्दार्थौ समानरूपेण अपेक्षितौ, तावपि शब्दार्थौ न सामान्यौ, परं ललितोचितौ शब्दार्थौ स्याताम् काव्यशरीरम्। तथाभूतावपि शब्दार्थौ यदा अप्रधानीभूतौ - कमपि अर्थविशेषं प्रकाशयतः स प्रकाश्यमानः प्रधानीभूतः अर्थः व्यञ्जनावादिनां काव्यशास्त्रिणां मते । ध्वनिः- ध्वननं, व्यञ्जनं, प्रकाशनम्। एवंविधस्य ध्वनेः पञ्चधा व्याख्यानं भवति-

- ध्वन्यते व्यज्यते अर्थविशेषः इति ध्वनिः, वस्तु - अलङ्काररसादिरूपः त्रिविधः अर्थविशेषः ।
- ध्वनति प्रकाशयति गुणीकृतस्वार्थः शब्दः अर्थविशेषं स व्यञ्जक शब्दो ध्वनिः ।
- ध्वनति प्रकाशयति गुणीकृतस्वरूपः अर्थविशेषं स व्यञ्जकः वाच्यार्थो, लक्ष्यार्थो, व्यङ्ग्यार्थो ध्वनिः ।
- ध्वन्यते प्रकाश्यते अर्थविशेषो यया शब्दवृत्त्या, सा व्यञ्जना वृत्तिः ध्वनिः ।
- ध्वन्यते प्रकाश्यते अर्थविशेषो यस्मिन् आश्रये, तत् काव्यं कविकर्म ध्वनिः।

एवं व्यङ्ग्यार्थः, व्यञ्जकः शब्दः, व्यञ्जकः त्रिविधार्थः, व्यञ्जनावृत्तिस्तथा प्रधानीभूतव्यङ्ग्यार्थाश्रयं काव्यम्, एतत् सर्वं ध्वनिपदेन गृह्यते, परं व्यज्यमानस्य अर्थस्य प्राधान्ये सत्येव ध्वनित्वव्यपदेशः ।

**उत्तमं काव्यम्-**

ध्वन्यालोककारः कविकर्मणः काव्यस्य यं प्रकारं 'काव्यविशेषो ध्वनिरिति ' निश्चिनोति, काव्यप्रकाशकारमतेन स कविकर्मणः उत्तमः प्रकारः, अतः प्रधानीभूतो व्यङ्ग्यार्थो ध्वनि :- उत्तमं काव्यम् । काव्यप्रकाशकारः काव्यसामान्यलक्षणे 'तददोषौ शब्दार्थौ' इत्यादौ तत्पदप्रयोगं तथा काव्यभेदस्य प्रथमप्रकारस्य ध्वनिनाम्नः उत्तमकाव्यस्य लक्षणे - ' इदमुत्तम...... .' इत्यादौ इदं-पदप्रयोगं कृतवान्। अत्र अनयोः सर्वनाम्नोः तत्-इदं-रूपयोः प्रयोगविषये पूर्वत्र तत्-पदेन काव्यं गृह्यते, यस्य पूर्वं प्रयोजनं कारणं च लक्षितं, तत् - काव्यस्वरूपं विशिष्टं शब्दार्थयुगलमिति । उत्तरत्र बुद्धौ अवगतं तादृशस्वरूपं काव्यं भेदकथनक्षणे इदं सर्वनाम्ना गृहीतम्। एवमनयोः सर्वनाम्नोः सामान्याभिप्रायः । परं केषाञ्चिन्मते-तत्पदेन यत् काव्यसामान्यस्वरूपम् अभिहितं, तत्र तत्सर्वनाम्ना स्वपूर्वाचार्याणां भामहादीनां प्रायशः यत्काव्यस्वरूपम् अभिप्रेतमस्ति, तस्य परोक्षवाचकेन पदेन ग्रहणं सङ्केतितम्। पुनश्च आदर्शभूतस्य आनन्दवर्धनाचार्यस्य अभिप्रेतं यत्काव्यस्वरूपं, तत्स्वनिकटपूर्ववर्तिनः मतस्य सङ्केतः इदं - सर्वनाम्ना कृतो विद्यते । अस्मिन्नेव मते काव्यस्य आभ्यन्तरस्वरूपप्रकाशनत्वात् इदं - पदप्रकाशिते आधुनिककाव्यसमीक्षकसिद्धान्ते स्फुटालङ्कारविर रसाभिव्यक्तिसाधके शब्दार्थयुगले काव्यत्वस्वीकृतेः स्वसम्मतेः सङ्गतिः जायते। अथ काव्यसामान्ये ज्ञाते तद्विशेषजिज्ञासाशमनाय उत्तममध्यमाधमरूपेण तस्य भेदस्वरूपाणि ग्रन्थकारेण प्रकाशितानि। तत्र प्रथमभेदः ध्वनि: उत्तमं काव्यम्। उत्तमत्वादिना काव्यविभागः लोकेऽपि विभाजनं त्रिप्रकारकं भवति। परीक्षापरिणामे श्रेणीविभाजनमपि त्रिविधम् । पुरस्कारस्यापि त्रैविध्यम्। एवं मम्मटस्य काव्यविभागो लोकव्यवहारवत् त्रिविधः ।

वस्तुतः व्यङ्ग्यार्थ एव काव्यस्य प्राणभूतं जीवातुतत्त्वम् । तस्य यथा स्थितिः, तथा काव्यविभाजनम् । स व्यङ्ग्यार्थः क्वचित् स्फुट: क्वचिच्च अस्फुट: । व्यङ्ग्यार्थस्य स्फुटावस्थायाः प्राधान्ये सति काव्यस्य उत्तमता, अस्फुटावस्थायाम् अधमता। स्फुटावस्थायाः अन्यापेक्षया अप्राधान्ये मध्यमता । एवं काव्यस्य त्रिधा विभाजनम् । अभिधावृत्तिप्रतिपाद्याद् अर्थाद् व्यञ्जनावृत्तिप्रतिपाद्ये अर्थे अधिकचमत्कारजनके सति

कविकर्मणः उत्तमत्वम्, तदेव तत्पण्डितैः, ध्वनिपदेन उक्तम् । संक्षेपेण व्ययार्थस्य प्राधान्ये ध्वनिः- उत्तमं काव्यम् ।

**दृश्यकाव्यम्-**

द्रष्टुं योग्यं दृश्यम् इति व्युत्पत्या दृश् धातोः 'ऋगुपधाच्चाक्लृपिचृतेः (3.1.110) इति सूत्रेण क्यप्प्रत्यये विभक्त्यादिकार्ये कृते दृश्यमिति पदं निष्पद्यते। दृश्यं दर्शनीयप्रधानम्। अर्थाद् यत्काव्यं पठनश्रवणाभ्यां सहैव द्रष्टुं योग्यमपि भवति तत् काव्यं दृश्यमिति उच्यते। अस्य दृश्यकाव्यस्य अवस्थाभेदात् क्रियाभेदाद्वा अनेकानि नामानि सन्ति। यथा नाट्यं, रूपकम्, रूपमित्यादि। नट् अवस्कन्दने धातोः ण्यत्प्रत्यये णित्वादादिवृद्धौ विभक्तिकार्ये च कृते नाट्यमिति पदं निष्पद्यते। कस्यापि अनुकार्यस्य अवस्थाविशेषादेः अनुकरणं नाट्यमित्युच्यते। तथा हि धनञ्जयः दशरूपके 'अवस्थानुकृतिर्नाट्यमि 'त्याह ।

रूपयति अन्यस्य रामादेः रूपेण अन्यान् नटान् अनुकरोति इत्ति रूपकम्। यद्वा, रूपाणां रामादिस्वरूपाणाम् आरोपाद् वेषाभिनयाभ्यां तदारोपस्यानेन बोधनाद् रूपकमिति कथ्यते। किञ्च, तद्रूपकमभेदो यः उपमानोपमेययोः इति लक्षणाद् यथा मुखादौ पद्मादेः चन्द्रादेर्वा आरोपः, तथैव नटादौ यत्र अनुकार्यस्य नायकादेरारोपः तद्रूपकमिति गीयते। उक्तञ्च मन्दारमरन्दाख्ये नाट्यग्रन्थे-

**यथा मुखादौ पद्मादेरारोपो रूपकं मतम्।**

**तथैव नायकारोपो नटे रूपकमुच्यते ।।**

अत एव दशरूपके "रूपकं तत्समारोपादि 'त्युक्तम् ।। एवमेव रूप्यते - दृश्यते यत्तद्रूपमिति नाज्यस्य अपरं नाम अस्ति 'रूपं दृश्यतयोच्यते" इति दशरूपकग्रन्थस्वारस्याद्व्याख्यातम्।'

**रूपकभेदाः -**

रूपकस्य दश भेदाः भवन्ति नाटकम्, प्रकरणम्, भाणः, व्यायोगः समवकारः, डिमः, ईहामृगः, अङ्कः (उत्सृष्टाङ्कः) वीथी, प्रहसनम् इति। क्रमभेदेन धनञ्जयविरचिते दशरूपकनामके ग्रन्थे अपि रूपकस्य एते भेदाः उद्दिष्टाः सन्ति। तथा हि-

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**

**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥**

एतेषां विस्तरेण विवेचनं भवान् पठिष्यति।

**१.नाटकलक्षणम्-**

नाट्यस्य दशसु भेदेषु नाटकमन्यतमं विद्यते । नट् अवस्कन्दने धातोः ण्वुल् प्रत्ययेन निष्पन्नस्य नाटकशब्दस्य नाटयति विचित्रं रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्तयतीत्यर्थो भवति। यद्यपि श्रव्यकाव्यमपि वैचित्र्यसमन्वितया कथया सभ्यान् रञ्जयत्येव, किन्तु रूपकं दृश्य श्रव्यो भयविधिना सामाजिकानावर्जयतीति विशेषो बोध्यः । अत्र मुख-प्रतिमुख-गर्भ- अवमर्श - उपसंहृति इति पञ्चभिः सन्धिभिः समन्वितं प्रसिद्धम् इतिवृत्तं भवति। इदमितिवृत्तं नायकस्य गुणैः विलासैः ऋद्धिभिः दयादाक्षिण्यप्रियप्राप्त्यादिभिः नानाविभूतिभिः संयुतं भवति । मध्ये मध्ये नानाविधानां सुखदुःखानां समुद्भूतिः श्रृङ्गारहास्यादीनां रसानां विलासश्च भवति । नाटके न्यूनातिन्यूनाः पञ्च, अधिकाधिकाः दश चाङ्काः भवन्ति। तथा चोक्तं दशरूपके- 'पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परमिति । नाटके रामायणमहाभारतादिप्रसिद्धः, राजर्षिः, दया - दाक्षिण्यादिगुणसम्पन्नः, प्रख्यातवंशः, धीरोदात्तादिलक्षणसम्पन्नः प्रतापवान्, प्रशस्तगुणसंयुक्तः, दिव्य, दिव्यादिव्यो वा नायको भवति। नवरसरुचिरेऽपि नाटके वीरश्रृङ्गारकरुणरसेषु एक एवाङ्गीरसो भवति । अन्ये चाङ्गानि भवन्ति। मूलग्रन्थे

'एक एव भवदेङ्गी वीरश्शृङ्गार एव वे 'ति कथनन्तु समुचितरसबोधकम् अस्ति। अर्थात् करुणादयः रसा अपि अङ्गिनो भवितुमर्हन्ति अन्यथोत्तररामचरिते करुणस्य, प्रबोधचन्द्रोदये च शान्तस्य अङ्गित्वम् अव्याहतं भवेत् । अत उक्तं ध्वनिकारेणापि-

**प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने ।**

**एको रसोङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता॥**

केचित्तु श्रृङ्गार-वीर - शान्तानां मध्ये यः कश्चिदेकः एव रसो नाटके प्रधानतया निबद्धव्य इति जगदुः। येन प्रबोधचन्द्रोदयस्य नाटकत्वाक्षतावपि उत्तररामचरितस्य नाटकत्वमव्याहतं स्यादिति ध्वनिकारोक्तमेव ज्यायस्त्वम् । नाटकस्यान्ते निर्वहणसन्धौ अद्भुतरसस्य समावेशो भवति। तथा चोक्तं नाट्यशास्त्रेऽपि-

**सर्वेषां काव्यानां नानारसभावयुक्तियुक्तानाम्।**

**निर्वहणे कर्तव्यो नित्यं हि रसोऽद्भुतस्तज्ज्ञैः॥**

नाटके नायककर्मणि संलग्नाः चत्वारः पञ्च वा मुख्याः पुरुषाः भवन्ति । नाटकस्य रचना गोपुच्छसदृशं भवति । तथा चोक्तं भरतेनापि - 'कार्यं गोपुच्छाग्रं कर्तव्यं बन्धमासाद्य । ' किन्तु 'गोपुच्छाग्रमि 'ति पदमङ्गीकृत्य टीकाकारेषु विप्रतिपत्तयः सन्ति । तथाहि-

1. नाटके क्रमेण उत्तरोत्तरमङ्काः लघवः स्युरिति केचित् ।

2. यथा गोपुच्छे केचिद् बालाः लघवः केचिद्दीर्घाश्च भवन्ति तथैव नाटके केचिदङ्काः ह्रस्वाः केचिच्च दीर्घाः कर्तव्याः इत्यन्ये ब्रुवते । एवं नाटके कानिचन कार्याणि मुखसन्धौ कानिचन प्रतिमुखसन्धौ, कानिचन च

ततोऽग्रे समाप्यानि भवन्ति । वस्तुतस्तु गोः पुच्छस्य अग्रभागे द्वित्राः बाला, अग्रे ततोऽधिकाः भवन्ति । तथैव नाटके आदौ कथावस्तु लघ्वाकारेण आरभ्यते, अग्रे च बृहदाकारेण वर्ण्यते।

एवं नाटके अवस्था-अर्थप्रकृति - सन्धिप्रभृतीनां सर्वेषां नाट्यतत्त्वानां समावेशो भवति । नाटकस्य कथावस्तुनि रसविरुद्धमनुचितं च कथावस्तु अन्यथा प्रकल्पयेत्, अथवा तत् परित्यजेद्वेति दशरूपके लिखितमस्ति-

**यत्तस्यानुचितं किञ्चिन्नायकस्य रसस्य वा ।**

**विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥**

यथा छद्मना बालिवधो मायुराजेनोदात्तराघवे परित्यक्तः । वीरचरिते च रावणसौहार्देन बाली रामवधार्थमागतः रामेण हत इत्यन्यथा कृतः । अङ्कप्रभृतीनां निरूपणमग्रिमे पाठे अवलोकनीयम्।

**२.प्रकरणस्वरूपम्-**

रूपकभेदेषु प्रकरणम् अन्यतमं वर्तते । प्रकर्षेण क्रियते कल्प्यते नेता फलं वस्तुव्यस्त-समस्ततया अत्रेति प्रकरणम् । अत्र वर्णनीयं नायकसम्बन्धीतिवृत्तं लौकिकं कविकल्पितं वा भवति । तथा चोक्तं महर्षिणा-

**यत्र कविरात्मबुद्धया वस्तु शरीरं नायकञ्चैव ।**

**औत्पत्तिकं प्रकुरुते प्रकरणमिति तद् बुधैर्ज्ञेयम् ॥**

अर्थाद् यत्र नाट्ये कविः आत्मबुद्ध्या = स्वकल्पनया वस्तुशरीरं नायकं = नाट्यपात्राणि च औत्पत्तिकं = उत्पत्त्यासम्बद्धं, कृत्रिम वा प्रकुरुते = करोति, न तु पुराणेतिहासरामायणप्रसिद्धं नायकं करोति तद् बुधैः नाट्यतत्त्वविद्भिः प्रकरणमिति ज्ञेयम् ।

अत्र शृङ्गाररसोऽङ्गी भवति । अन्ये रसाश्चाङ्गानि भवन्ति । नायकः च ब्राह्मणः, आमात्यः, वणिग्वा भवति । स हि नायक : सापायाः विघ्नसहिताः ये धर्मार्थकामाः तेषु आसक्तो मुक्तावनासक्तश्च भवति । अतएव धर्मार्थकामानां विशेषणत्वेन सापाय इत्युक्तिः । चतुर्विधेषु धीरोदात्तादि नायकेषु अत्र धीरप्रशान्तको नायको भवति । यो हि धर्मं स्वर्गसाध नत्वेन, कामं पुत्रपश्वादिविषयकत्वेन, अर्थञ्च भोगसाधनत्वेनाङ्गीकरोति । तथा चोक्तम् सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् । तत्र आदौ विप्रनायकस्योदाहरणं मृच्छकटिकम्, अमात्यनायकस्य मालतीमाधवम्, वणिङ्नायकस्य चोदाहरणं पुष्पभूषितमित्यवधेयम्। स्त्रीपात्रानुसारेणापि प्रकरणभेदो वर्तते । अत्र नायिका क्वचित् कुलजा ( कुलस्त्री) क्वचित् वेश्या, क्वचित् च उभयात्मिका भवति । तत्र कुलस्त्रीनायिकं प्रकरणं शुद्धं, वेश्यानायिक धूर्तम्, उभयनायिकञ्च मिश्रमित्युच्यते । मिश्रं प्रकरणं कितवधूर्तसकारविटचेटैः संकुलं भवति। तत्र क्रमेण एतेषां पुष्पभूषितम्, रङ्गवृत्तम्, मृच्छकटिकञ्चोदाहरणानि । उक्तञ्च काव्येन्दुप्रकाशे-

**शुद्धं धूर्तमिश्रञ्च भेदात्तत्त्रिविधं पुनः ।**

**कुलस्त्रीनायिकं शुद्धं गणिकानायिकं परम् ॥**

**प्राधान्यमुभयोर्यत्र मिश्रं प्रकरणं विदुः ॥**

तत्र कुलस्त्री संस्कृतेन, वेश्या च प्राकृतेन भाषादिकं व्यवहरति । तथा चोक्तं मन्दारमन्दे- तत्र वेश्या प्राकृतं तु कुलजा संस्कृतं वदेत् ॥ इति । अन्यत्सर्वं नाटकवन्मन्तव्यम्। तथा चोक्तम्- विना विशेषं सर्वेषां लक्ष्म

नाटकवन्मतम् इति। साहित्यदर्पणस्य लक्ष्मीटीकायां प्रकरणलक्षणस्य परिष्कारः एवमस्ति - 'कविकल्पितलौकिकवृत्तान्तजन्यत्वे सति विनाशशालि धर्मार्थकामतत्परः धीरप्रशान्तक-विप्रामात्यवणिगान्यतमनायकवच्छृङ्गाररसप्रधानदृश्यकाव्यत्वं प्रकरणमिति प्रकरणस्य सामान्यलक्षणम् । प्रकरणस्य स्वरूपं रेखाचित्रेण एवं बोध्यम्-

**३.भाणस्वरूपम्**

भाणनामके रूपकभेदे धूर्तस्य नायकस्य नानावस्थात्मकं चरितं वर्णितं भवति । अत्र एक एव अङ्कः, एक एव च अतीवकुशलः पण्डितो विटो वा नायकः भवति । यो हि एकाकी एव आकाशभाषितं करोति । अतः एव अस्य भाण इत्यन्वर्थ संज्ञा अस्ति । भण्यते व्योमोक्त्या नायकेन स्वपरवृत्तं प्रकाश्यते इति भाणः । अस्य नायकः स्वानुभूतम् इतरेणानुभूतं वा वृत्तं केनापि प्रकारेण बुद्धवा नाट्यशलायाम् आकाशभाषितैः सम्बोधनेन वा उक्तिं प्रत्युक्तिं प्रकरोति । शौर्यसौभाग्यवर्णनैः अर्थात् शौर्यस्य पराक्रमस्य, सौभाग्यस्य माङ्गलिककार्यस्य वर्णनैः, वीर - श्रृङ्गाररसौ सूचयति । अनेन प्रकारेण शौर्यवर्णनैः वीररसं, दम्पत्योः सौभाग्यवर्णनैश्च श्रृङ्गारं सूचयति । अत्र भाणरूपके इतिवृत्तं प्रायेण उत्पाद्यमेव भवति। सात्वती-आरभटीकैशिकीप्रभृतयः वृत्तयः क्वचित्कचित्प्रयुज्यन्ते । प्राचुर्येण तु भारतीवृत्तिरेव प्रयुक्ता भवति । केवलं मुखसन्धेः निर्वहणसन्धेश्च प्रयोगो भवति । अत्र गे यपद-स्थितपाठ्य- आसीन - पुष्पगण्डिका - प्रच्छेदक - त्रिगूढक - सैन्ध व-द्विगूढक-उत्तमोत्तमक-उक्तप्रत्युक्तकेति दश लास्याङ्गानि भवन्ति । शेषं सर्वं कृत्यं नाटकवदेव विज्ञेयम्। लीलामधुकरनामकं पुस्तकं भाणरूपकस्योदाहरणम्।

**४. व्यायोगस्वरूपम् –**

व्यायोगनामके रूपके पुराणेतिहासादिषु प्रसिद्धमितिवृत्तं भवति । विशेषेण आसमन्ताद् युज्यन्ते काव्यार्थं समारभन्ते अनेके पुरुषाः यत्रासौ व्यायोगः । अस्मिन् स्त्रीपात्राणामल्पता पुरुषपात्राणाञ्च बहुलता भवति । अयमेकाङ्को भवति । गर्भविमर्शसन्धिवर्जं मुख-प्रतिमुख–उपसंहृतीति त्रयः सन्धयः भवन्ति। स्त्रीनिमित्तमत्र युद्धं वर्जितं भवति । यथा परसुरामेण पितृवधकोपात् सहस्रार्जुनस्य वधः कृतः । कैशिकीं वृतिं वर्जयित्वा प्रायेण अन्याः सर्वाः वृत्तयः भवन्ति । नायकः दिव्यादिव्यो वा प्रसिद्धः धीरोद्धातो भवति । हास्य - शृङ्गार - शान्तरसानपहाय अन्यः कश्चिदपि रसो अङ्गी भवितुमर्हति । उदाहरणञ्चास्यै मध्यमव्यायोगः महाकविश्रीभासविरचितः अस्ति ।

**५.समवकारस्वरूपम्-**

समवकीर्यते कविभिर्निबध्यते इति समवकारः । सम् पूर्वकात् करोतेः 'अकर्तरि च कारके संज्ञायाम्' सूत्रेण घञ् प्रत्यये समवकारशब्दो निष्पद्यते । अयं रूपकभेदेषु अन्यतमः। लक्ष्मीटीकायामस्यार्थोऽस्ति - " यत्र सङ्गतैः अवकीर्णैश्चार्थैः त्रिवर्गोपायैः पूर्वसिद्धैरेव क्रियते निबध्यते स समवकारः" इति । समवकारे देवासुरयोः आश्रितम् इतिहासपुराणादिषु प्रसिद्धम् इतिवृत्तं वर्णितं भवति। अत्र विमर्शसन्धिं विहाय प्रायेण अन्ये मुख- प्रतिमुख-गर्भ - अवमर्शाख्याः चत्वारः सन्धयो भवन्ति, त्रयः अङ्काश्च भवन्ति । प्रथमाङ्के मुखप्रतिमुखसन्धी भवतः । द्वितीयतृतीयाङ्कयोः प्रख्याताः दिव्यादिव्याः धीरोदात्ता: द्वादशनायकाः भवन्ति। येषां फलं पृथक् पृथग् भवति। यथा समुद्रमन्थनाख्ये समवकारे शिव-विष्णु-इन्द्रादीनां नायकानां विषपान-लक्ष्मीप्राप्ति- ऐरावत - लाभादीनि फलानि । प्रायेण वीररसप्रधानाः सर्वेऽपि रसाः, स्वल्पकैशिकीसहिताः सर्वाः भारत्यादयः वृत्तयः, उद्घात्यक- अवलगित-प्र त्रिगत-छल-वाक्केलि-अधिबल - गण्ड-अवस्यन्दित - नालिका -असत्प्रलाप - व्याहार मृदवाख्यानि त्रयोदश वीथ्यङ्गानि, षडक्षरा गायत्री - सप्ताक्षरा चोष्णिक् - सहितानि अनेकानि छन्दांसि, धर्म-अर्थकामात्मकः त्रिशृङ्गारः, स्वाभाविक - प्राकृतिक - कृत्रिमात्मक: त्रिकपटः, चेतन-अचेतन-चेतनाचेतनात्मकः

कौतुकप्रतरणादिविशेष: त्रिवद्रवः च निबद्धाः भवन्ति। प्रथमाङ्कीया कथावस्तु द्वादशनालिकाभि: (चतुर्विंशतिघटिकाभिः) द्वितीयाङ्कीया तृसृभिः घटिकाभि:, तृतीयाङ्कीयं च कथावस्तु द्वाभ्यां घटिकाभ्यां प्रदर्शनीयं भवति । शेषं कृत्यमत्र नाटकवदेव भवति। तथा चोक्तम्– 'विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतमिति । किन्तु विन्दुप्रवेशको अत्र न भवतः इति नाटकादस्य विशेषोऽवगन्तव्यः ।

**६.डिमस्वरूपम् -**

डिमः सङ्घातः, इति नायकानां सङ्घातात्मकत्वात् नायकानां समूहः संप्लवो वा डिम इत्युच्यते। तद्योगादिदं रूपकमपि डिम इति प्रसिद्धम् । अत्र इतिवृत्तमैतिहासिकं भवति। माया इन्द्रजाल-सङ्ग्राम-क्रोध- उन्मत्तादीनां चेष्टया सूर्यचन्द्रमसोः ग्रहणात्मकैः इतिवृत्तै: व्याप्तं रूपकं डिम इति कथ्यते । अत्र रौद्ररसोऽङ्गी भवति । अन्ये सर्वे रसाः अङ्गानि भवन्ति। अङ्काश्चत्वारः, अत्र विष्कम्भकप्रवेशकयोः अभावः भवति । देव- गन्धर्व-यक्ष-राक्षसमहोरग-भूतप्रेत-पिशाचप्रभृतयः अत्यन्तमुद्धताः षोडशसंख्याकाः नायकाः भवन्ति । कैशिकीवर्जम् अन्याः भारत्यादयः वृत्तयः, शान्त - हास्य - श्रृङ्गारवर्जमन्ये दीप्ताः षड् रसाः वीरबीभत्सादयः अत्र भवन्ति। त्रिपरदाहाख्यं रूपकमस्योदाहरणम् । दीप्तरसेष्वपि प्रायेण रौद्ररसोऽङ्गी भवति । अन्ये भवन्ति चाङ्गानि भवन्ति ।

**७.ईहामृगस्वरूपम् -**

मृगवदलभ्यां नायिकामत्र नायक : ईहते इति ईहामृगः । ईहामृगशब्दः पृषोदरादित्वात् साधीयः। अस्मिन् रूपके ख्याताख्यातरूपम् ऐतिहासिकं कल्पितं वृत्तं वा इतिवृत्तं चतुर्षु अङ्केषु वर्णितं भवति। अत्र मुख - प्रतिमुखनिर्वहणाख्याः त्रयः सन्धयो भवन्ति । अत्र नायकप्रतिनायकौ प्रसिद्धौ धीरोद्धतौ नरौ देवौ वा भवतः । यद्वा, नरो नायकः दिव्यश्च प्रतिनायकः, अथवा, नरः प्रतिनायकः दिव्यश्च, नायकोऽत्र भवतीति भावः । तयोः आद्यः धीरः अन्त्यः उद्धतः मूढस्वभावात् च अयुक्तकार्यकारी भवति । अत्र

क्वचित् क्वचित् स्वस्य रमणमनिच्छन्तीं दिव्यां स्त्रियम्प्रति बलात्कारेण छलेन च सुरतं कामयमानस्य प्रतिनायकस्य दुश्चेष्टामपि कविः शृङ्गाराभासरूपेण प्रदर्शयति । अत्र स्वर्ग्याः मर्त्याः वा उद्धतस्वभावाः दशसंख्याकाः पताकानायका अपि भवन्ति । एवं नायकौ द्वौ, पताकानायकाश्च दश इति आहत्य द्वादशनायकाः भवन्ति। अत्र क्रुद्धाः नायकाः युद्धायोद्यता अपि कार्यान्तरच्छलेन युद्धात् निवर्तन्ते। अत्र 'आततायी वधार्हणः' इत्युक्त्या वधयोग्या अपि महात्मानः वधानर्हत्वात् वध्याः दण्ड्याः वा न भवन्ति। अत्र एक एवाङ्कः, देव एव नायकः इति कस्यचिन्मतम् । केचन च षड्नायकम् ईहामृगं स्वीकुर्वन्ति । केचन दिव्यस्त्रीहेतुकमत्र युद्धं भवतीत्यपि वदन्ति। अस्य रूपकस्योदाहरणमस्ति- कुसुमशेखरविजयम्।

**८.अङ्कस्वरूपम्-**

अङ्काः नाटकेष्वपि भवन्ति । तेभ्यः नाटकीय- अङ्केभ्यः पार्थक्यं प्रदर्शयितुमुत्सृष्टाङ्क इति नामान्तरमस्ति । अत्र सृष्टिः विपरीता भवतीति उत्क्रान्त इति नामेत्यप्याहुः । तथा चोक्तं मूले 'इमं च केचित् नाटकाद्यन्तः पात्यङ्कपरिच्छेदार्थमुत्सृकाङ्कनामानम् आहुः । अन्ये तु उत्क्रान्ता = विलोमरूपा सृष्टिर्यत्रेत्युत्सृष्टिकाङ्कः इति निगदन्ति । अत्र एक एवाको भवति, प्राकृतः सामान्यो जनो नायको भवति। करुणरसोऽत्राङ्गी भवति । स्त्रीविलापोऽत्राधिक्येन प्रदर्श्यते। कथेतिहाससिद्धा भवति । यां कविः स्वप्रतिभया विस्तारयति । सन्धि-वृत्ति - अङ्गानि च भाणवदेव भवन्ति । एवमेव जयपराजयौ, वाक्कलहः निर्वेदवचनानि चाधिक्येन वर्णितानि भवन्ति।

**भासः**

भासस्य काले निर्णये प्राचां कवीनां लेखकानाञ्च लेखा अवलम्बनानि ।

तत्र -

१. कालिदासेन 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम्' इत्यादरा- तिशयेन सह तदीया प्रचुरा प्रसिद्धिरुक्ता ।

२. 'गौडवहो' नामकप्राकृतप्रबन्धे वाक्पतिना 'भासम्मि जलनमित्ते' इत्यमिधाय कथामेकां प्रतीङ्गितं कृतम्। सा च-भासो व्यासश्च प्राचीन मुनी 'विष्णुधर्म' नामकं ग्रन्थं स्वस्वविनिर्मितं प्रकर्ष परीक्षार्थं पावके प्रचिक्षिपतुः । वह्निश्च विष्णुधर्मं भासकृतं नाधाक्षीत् ।

३. उक्तमेवार्थं द्वादशशताब्दीसम्भूतो जयानको नाम कविः स्वीये 'पृथ्वी- राजविजय' नामके काव्ये-

'सत्काव्यसंहारविधौ खलानां दीप्तानि बहेरपि मानसानि ।

भासस्य काव्यं खलु विष्णुधर्मं सोऽप्याननात् पारदवन्-सुमोच ।।'

इति निबबन्ध

४. अभिनवगुप्तः स्वकृतेऽभिनवभारतीग्रन्थे भासं स्मरन् पद्यमिदं तन्नाट- कादुद्धृतवान् । महाकविना भासेनापि स्वप्रबन्धे उक्तम् -

त्रेतातायुगं तदिह हन्त न मैथिली सा, रामस्य रागपदवीमृदु चास्य चेतः ।

लब्धा जनस्तु यदि रावणमस्य कायं, प्रोत्कृत्य तन्न तिलशो न वितृप्तिगामी ।।'

५. बाणभट्टः स्वीये हर्षचरिते भासस्य विषये 'सूत्रधारकृतारम्भैः' इत्या- द्युक्तवान् ।

६. दण्डिनापि भासः 'सुविभक्तमुखाद्यङ्गैः' इत्यादिनाऽवन्तिसुन्दरीकथायां स्मृतः ।

७. प्रतिमानाटके बृहस्पतेरर्थशास्त्रं स्मृतं न चाणक्यस्य । एतेन चाण- क्यात् प्राचीनता भासस्यापतिता । भासस्य -

नवं शरावं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् ।

तत्तस्य माभून्नरकं स गच्छेद्यो भर्तृपिण्डस्य कृते न युध्येत् ।।'

पद्यमिदमुद्धरता चाणक्येनापि सा समर्थिता ।

८. राजशेखरः स्वकविविमर्शे लिखितवान् - 'भासो रामिलसौमिलौ वररुचिः श्रीसाहसाङ्कः कवि- र्मेण्ठो भारविकालिदासतरलास्कन्धः सुबन्धुश्च यः । दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः सिद्धा यस्य सरस्वती भगवती के तस्य सर्वे वयम् ।।' 'कारणं तु कवित्वस्य न सम्पन्नकुलीनता । धावकोऽपि हि यद् भासः कवीनामग्रिमोऽभवत् ।।'

९. आचार्यहेमचन्द्रेण दृष्णिडकृतकविहृदयव्याख्यायां स्वकृतायां लिखितं भासप्रसङ्गे-

'सम्प्रति परां काष्ठामारूढेनापि भासेन भूतपूर्वा स्वीयदशा न विस्मृता । यतोऽनेन पूर्वचरितं घटखर्परेणोदकवहनमेव प्रतिज्ञातम् । प्रतिज्ञां चेमामसह- मानाः परे कवयः परिहसितुमनसो विक्रमार्कसभ्यमेनं भासं तज्जातिस्मारक- घटखर्परनाम्ना व्यवजहुः । क्रमेण च स एव व्यपदेशो भासमहाकवेः सुप्रसिद्धः सम्पन्नः ।

१०. भरतप्रवत्तितनाटकीयनियमानां समादरो भासेन स्वकृतौ न कृतः, यथा स्थापनायां न कविनामनिर्देशः, अवतरणस्य स्थापनानाम्ना निर्देशो न प्रस्तावनानाम्ना । नान्दीपाठात् परतः सूत्रधारप्रवेशः । विनापि भरतवाक्यं ग्रन्थसमाप्तिः, मृत्युनिद्रायुद्धानां रङ्गमञ्चेऽवतारणा च । एतेन तस्य भरतप्राची- नताऽऽयाता ।

११. भासेन पाणिनिप्रवर्त्तित नियमानामनुरोधो नाचरितस्तेन तस्य पाणिन्यपेक्षया प्राचीनत्वम् ।

१२. रसपरिपाकमहिम्ना भाषाप्रवाहसाम्येन च भासस्य व्यासवाल्मीकि समयवर्त्तित्वमातिष्ठन्ते कतिपये । एभिर्द्वादशभिरपि कारणैर्भासस्य प्राचीनता सिद्धा भवति । सा च प्राची- नता कालिदासादपि प्राचीनमिमं साधयन्ती १०० ई० पूर्वमितं कालं भासस्य बोधयति ।

(क) 'ओफेसर वर्नद' महाशयो 'मत्तविलास' नामकग्रन्थेन सहैषां भास कृतत्वेन प्रथमानानां रूपकाणां सम्बन्धविशेषं दृष्ना स्त्रीष्टसप्तमशतकं भासस्य कालमाह ।'

(ख) 'स्टेनकोनो' 'विन्टरनिज' महाशयौ तु प्राकृतभाषापर्यालोचनया कालिदासाश्वघोषयोः प्राकृतयोर्यौ कालौ तदन्तरालवर्ती कोऽपि कालो भास- प्राकृतस्येति निश्चित्य स्त्रीष्टद्वितीयचतुर्थशतकयोरन्तराले कदाचिद् भासो बभूवेति तर्कयतः ।

(ग) महामहोपाध्यायो रामावतारशर्मा शूद्रककृतस्य मृच्छकटिकस्य कुत्सितं संक्षेपमात्रं चारुदत्तमिति दुर्बलमाधारं समाश्रित्य स्त्रीष्टद्वादशशतकभवत्वं भासस्योक्तवान् ।

सर्वमिदं विभावयन् जनः कामपि सन्देहदोलामिवाधिरोहति ।

तत्रेदं विचारणीयम्-प्राकृतभाषाविचारेण केवलेन कालो निर्णेतुमशक्य एव, भासस्य रूपकाणां केरलेऽश्वघोषरूपकस्य च वाह्लीकेषु उपलम्भात् ।

स्त्रीष्टद्वितीयशतकोत्कीर्णेषु रुद्रदामशिलालेखेषु दृश्यमाना कृत्रिमा काव्य- शैली भासरूपकेषु न दृश्यते, प्राचीनाः पाणिनिनाऽविचारिताः प्रयोगाश्च दृश्यन्ते । पञ्चरात्रस्य कथा सम्प्रत्युपलभ्यमाने महाभारते नास्ति ।अतिप्राचीन आलङ्कारिको भामहो भासकृतस्य प्रतिज्ञायौगन्धरायणस्था- लोचनां कृतवान् । प्रागुपन्यस्तास्तर्का भासस्य कालः स्त्रीष्टपूर्व चतुर्थशतकमिति बोधयितुमलम् । परमियं भासकालस्य पूर्वसीमा। अपरा सीमा स्त्रीष्टद्वितीयं शतकम् यतोऽनेन कौटिल्यार्थशास्त्रमस्मृत्वा बार्हस्पत्यं तत्स्मृतं पाणिनिविरुद्धः प्रयोगः कृतः, कालिदासश्चामुं स्वग्रन्थे स्मृतवान् । एवञ्च स्त्रीष्टपूर्वचतुर्थशतकस्य स्त्रीष्टद्वितीयशतकस्य च मध्ये कदाचित् भासो जात इति स्थूलरूपेण वक्तुं शक्यम् । मृच्छकटिकचारुदत्तसाम्यमूलकस्तर्कस्तु चारुदत्ते तत्तद्शुद्धिदर्शनान्मृच्छ कटिकस्यैव पूर्वभवचारुदत्तानुकृतिरूपत्वं प्रमापयतीति सर्वं पूर्वोक्तनिर्णयानु- कूलमेव । यस्य समये निर्णये इयती विगीतिस्तस्य चरितं कथं निश्चीयतामिति तद्विषये मौनमेव शरणम् ।

**भासस्य रूपकाणि**

महाकविभासस्य त्रयोदश निम्नलिखितानि रूपकाणि प्रसिद्धानि -

१. प्रतिज्ञायौगन्धरायणम्

२. अविमारकम्

३. स्वप्नवासवदत्तम्

४. प्रतिमानाटकम्

५. अभिषेकनाटकम्

६. मध्यमव्यायोगः

७. पञ्चरात्रम्

८. दूतवाक्यम्

६. दूतघटोत्कचम्

१०. कर्णभारः

११. ऊरुभङ्गम्

१२. बालचरितम्

१३. दरिद्रचारुदत्तम्

गोण्डलनिवासी राजवैद्यजीवरामकालिदासमहोदयः १६४१ स्त्रीष्टाब्दे 'यज्ञ- फल' नामकं रूपकमेकं प्रकाशितवान्, तद्धि भासकृतित्वेनाख्यायते । एवं सति भासस्य चतुर्दश रूपकाणि जातानि । एषु प्रतिज्ञायौगन्धरायणस्वप्नवासदत्ताविमारकाणि त्रीणि बृहत्कथाऽऽधा- राणि । प्रतिमानाटकमभिपेकश्चेति द्वे रामायणमूले । मध्यमव्या योगपञ्चरात्र- दूत घटोत्कच कर्ण भारो रुभङ्गयज्ञफलदूतवाक्यानि सप्त महाभारताश्रयाणि, बालचरितं भागवताश्रयम्, दरिद्रचारुदत्तं च कल्पितकथमिति विवेकः ।

१. मध्यमव्यायोगे-हिडिम्बानामकराक्षस्या सह भीमस्य प्रणयः, घटो- त्कचनामकपुत्रद्वारा चिरविरहितयोस्तयोः सङ्गश्च वर्णितः ।

२. दूतघटोत्कचे - हिडिम्बाभीमयोरात्मजस्य घटोत्कचस्य महाभारतीयं चरितम् ।

३. कर्णभारे-कर्णस्योदात्तं चरितम्, तेन हीन्द्राय कवचकुण्डले दत्ते ।

४. ऊरुभङ्गे- भीमेन प्रियापरिभवप्रतप्तेन दुर्योधनस्य जङ्घे भग्ने। संस्कृतसाहित्ये शोकान्तनाटकस्येदमेकं निदर्शनम् ।

५. दूतवाक्ये - दूतभूतस्य श्रीकृष्णस्य सदाशयतया सहैव दुर्योधनस्या- भिमानित्वं वर्णितम् ।

**अश्वघोषः**

अश्वघोषः स्वर्णाक्षीपुत्रः पार्श्वस्य शिष्यश्च कथ्यते । स हि मगधराजाश्रित आसीत् । उत्तरभारतशासकः कनिष्को मगधाधीशम् आक्रमणेन नमयित्वा राज्यस्य परिवर्त्ते वस्तुद्वयं दातुमादिष्टवान् - १. बुद्धस्य पात्रम् २. अश्व- घोषञ्च । राजा मगधानां पात्रं दातुमुद्यतोऽपि कविमश्वघोषं दातुं नैच्छत् ।

मन्त्रिणस्तं तथाऽवलोक्य चिन्तिता अजायन्त । राजा मन्त्रिणां बोधनाय उपायमेकं कृतवान्। स हि स्वाश्वशालास्थितेभ्योऽश्वेभ्यो दिनमेकं यावत् ग्रास- प्रदानं न्यषेधत् । दिनान्तरे सर्वषां हयानामत्र ग्रासं प्रदाय अश्वघोषाय स्वस- ङ्गीतिं कर्त्तुं प्रोक्तवान् । अश्वघोषस्य सङ्गीतिस्तथा मधुराऽजायत यथा तदाकर्ण- नासक्ता अश्वा ग्रासभक्षणं विहाय तां सङ्गीतिमेव श्रोतुमैहन्त, तदा मन्त्रिणः कवेरश्वघोषस्य मूल्यमजानन् । तदवध्येवासी तन्नाम्ना प्रथते स्म । वास्तविकं च तन्नामालुष्यत । अश्वघोषः कथञ्चित् कनिष्केण सह कश्मीरान् गतस्तेन बहारतश्च। कनिष्कसमकालिकतयाऽश्वघोपस्य समयः प्रथम ई० पू० स्थिरः । अश्वघोषस्य काव्यं चीनभाषायाम् ३८४-४१७ ई० समयेऽनूदितम् । इत्सिङ्गो नाम चीनवासी यात्री अश्वघोषं महोपदेशकं नागार्जुनात् पूर्ववर्त्तिनञ्चाह । अयं साकेतवासीति प्रसिद्धम् ।

बुद्धचरितं संस्कृतभाषामयं सप्तदशसर्गनिबद्धमेकं महाकाव्यं विद्यते । अत्र बुद्धस्य चरित्रमुपदेशाँश्च कविरवर्णयत् । चतुर्दशसर्गस्य मध्यादयं ग्रन्थः चीनभापानुवादेन सह न संवदति ।

प्रायोऽयं ग्रन्थः चतुर्दशसर्गमध्यभाग- पर्यन्त एव मिलति स्म, तदनन्तरभागो नश्यति स्म। पश्चादसौ केनचित् कविना निर्माय पूरितः ।

**कालिदासस्य समयः**

भारतीयकवीनां समयनिर्धारणमतिकष्टसाध्यं कार्यम्, यतस्तैः स्वविषये । किमपि न लिखितम् । अस्यां स्थितौ अन्यकृतैरुल्लेखैः अनुमानेन च प्राचां कत्रीनां समयो व्यवस्थापनीयो भवति । अस्मादेव हेतोः कालिदासस्य समय- सम्बन्धेऽपि मतभेदा वर्त्तन्ते-

१. सर विलियम जोन्स महोदयः विक्रमसंवत्प्रवर्त्तकस्य ईशवीयसंवत्- पूर्ववर्त्तिनः कस्यापि विक्रमादित्यस्य राज्ञः कल्पनां कृत्वा तत्सभामण्डनं कालि- दासं मत्वा ई० पू० प्रथमशताब्दीसमुद्भवत्वं कालिदासस्य मन्यते ।

२. डा० वेबर लौसन, याकोबि, मॉनियर विलियम, महानुभावानां सम्मतिषु ई० द्वितीयशतकचतुर्थशतकयोर्मध्यकालिकत्वं कालिदासस्य स्वी- क्रियते ।

३. डा० भाऊदाजी-महाशयस्तु उज्जयिनीनरेशो हर्षविक्रमादित्यो यं मातृगुप्तनामानं काश्मीरान् शासितुं प्रेषितवान् स मातृगुप्तः कालिदास एवेति मत्वा कालिदासस्य षष्ठशतकोद्भवत्वं स्वीकरोति ।

४. वत्सभट्टिमहोदयस्यैकः शिलालेखः प्राप्यते, यत्र ५२६ मालवसंवदुल्लेखो विद्यते, स च ई० ४७३तः संवदति । तस्य शिलालेखस्य भाषा कालिदासीयां भाषामनुहरति । एतदेवाधारीकृत्य मैक्डोनलमहोदयः कालिदासस्य पञ्चमशत- कोद्भवतामाह ।

५. डा० हार्नले प्रभृतयस्तु विद्वांसः कालिदासस्य काव्येषु गोप्ता-गोप्त्रे- कुमार-गुप्त-स्कन्द- प्रभृतिशब्दैः गुप्तवंश्यनृपाणां स्मरणं मन्यमानाः कालिदासस्य समयं पञ्चमं षष्ठं वेशवीयशतकमाहुः ।

६. ए० सी० चटर्जीमहोदयस्तु कालिदासं मालवनरेशयशोधर्मसमकालिकं मत्वा पष्ठशतकवर्त्तिनमाह ।

७. रामचन्द्रविनायकपटवर्धनस्तु 'आपाढस्य प्रथमदिवसे', 'प्रत्यासन्ने नभसि' इत्यादि पद्याधारेण ज्यौतिपानुसारिणीं गणनां कृत्वा १८०० वर्ष- पूर्ववर्त्तिनं कालिदासमातिष्ठते ।

८. आर० कृष्णमाचारियर-महाशयो मेघसन्देशविमर्शनामकग्रन्थे लिखति यत् 'दिङ्नागानां पथि परिहरन्' इति श्लोकस्य साक्ष्येण दिङ्नागसमकालिकः कालिदासः ई० पष्ठशतकेऽवर्त्ततेति ।

९. म० म० रामावतारशर्मा महोदयः कालिदासं द्वितीयचन्द्रगुप्तसमकालिकं मत्वा ३७५तः ४५० ई० मध्यवर्त्तिनं सप्रमाणं साधयति ।

विचारकास्तु-प्राचीनसमये मालवनामकगणस्य प्रामुख्यमवर्त्तत, ई० पूर्वतृतीयशत के क्षुद्रकगणेन सह मिलित्वा मालवगणः सिकन्द्रेण सह युयुधे, सहायकाभावात् परं पराजीयत । अयमेव मालवगणो ग्रीकाणां सतताक्रमणात् पीडितः सन् राजस्थानमागत्य ई० प्रथमशत के मालवदेशं स्वायत्तीचकार । गणराज्येऽस्मिन् विक्रमादित्यो मुख्योऽवर्त्तत । शकान् पराजित्यायं शकारि-पदवीमभजत् । एतत्प्रवर्त्तितसंवत्सरस्य गणनाम्ना मालवसंवत्-नाम्ना व्यवहारः प्रचलितः । अतः ई० पू० प्रथमशतके विक्रमादित्यस्य सत्तया तत्सभायां स्थितस्य कालिदासस्य स एव समयः संभवति ।

किञ्च-निश्चितः समयोऽश्वघोषस्य, स हि कुपाणनरेशकनिष्कसमकालिक तया प्रथमशताब्दीस्थितः । तत्काव्ये कालिदासस्य काव्यमनुक्रियमाणं वीक्ष्यते । रघुवंशे कुमारे च विद्यमानं पद्यं बुद्धचरितेऽश्वघोषेण किञ्चिदेव विपर्यस्योपन्यस्तम्, अतोऽश्वघोषात्पूर्ववर्ती सम्भवति कालिदासः । तदाभ्यां सम्भवप्रमाणाभ्यां कालिदासस्य ई० पूर्वप्रथमद्वितीयशतक सम्भवत्वं स्वीकर्त्तुं समर्थयन्ते ।

**माघः**

शिशुपालवधप्रणेतुर्माघस्य पितामहः सुप्रभदेवः गुर्जरशासकस्य वर्मलात- नाम्नो नृपस्य मन्त्री आसीत् । माघस्य पिता दत्तको विद्वान् दानप्रसिद्ध- श्चासीत् । माघस्य जन्म विद्यापीठतया

राजधानीभावेन च पुरा प्रथिते मीन- मल्लाख्यनगरे अभवत् । अत्रैव मीनमल्ले स्थित्वा ज्यौतिषाचार्यो ब्रह्मगुप्तो ब्रह्म- स्फुटसिद्धान्तनामकं ग्रन्थं निबबन्ध । पितुर्दानशीलतायाः प्रभावो माघस्या- प्युपरि पतितः । असीमदानदोषेणायं निर्धनत्वं गतः ।

भोजेन माघस्य सख्या तस्मै द्रव्य साहाय्यं दत्त्वोपकारः कृतः । अत्र केचित् भोजस्य माघस्य चासमकालिकत्वेन साहाय्यवृत्तान्तमसत्यमातिष्ठन्ते, परं भोजस्यैकस्य भिन्नकालिकत्वेऽपि परस्य भोजस्य तत्कालजातत्वे न किमपि हीयते । कर्नलटॅंड महाशयेन त्रयो भोजाः सप्रमाणं स्वीकृताः। तस्मान्माघकालेऽपि भोजस्य सद्भावः सम्भवति ।

**माघस्य समयः**

वसन्तगढनामके स्थाने एकः शिलालेखः प्राप्तः, स हि ६२५ ई० वर्षे उत्कीर्णो विधते । तत्र वर्मलात इति नाम लिखितम्, अतः सप्तमशतकप्रारम्भो माघस्य समयो निश्चीयते । माघस्य काव्ये द्वितीयसर्गे एकः श्लोको विद्यते -

**अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।**

**शब्दविद्येव नो भाति राजनीतिरपस्पशा ।।**

अत्र श्लोके वृत्तिन्यासशब्दयोः प्रयोगेण वृत्तिन्यासकाराभ्यां माघेन पश्चाद्- भाविना भवितव्यम् । वृत्तिकर्त्ता जयादित्यश्च ६६१ ई० वर्षे मृत इति इत्सिङ्ग कथनम्, अतो माघः अष्टमसर्गादौ समुद्भूतः स्यान्न तु ततः पूर्वमिति केच नाभिप्रयन्ति, परन्तु तन्न युक्तम्, ततः प्राचीनस्यापि वृत्तिग्रन्थस्य प्रमाण- सिद्धत्वात् । यदि जयादित्यात् पूर्वं वृत्तिग्रन्थो नाभविष्यत्तदा बाणेन वृत्तेश्चर्चा स्वीये हर्षचरिते कथमकरिष्यत ? उक्तं हि तेन हर्षचरिते-

'प्रसन्नवृत्तयो गृहीतवाक्याः कृतयुगपदन्यासालोक इव व्याकरणेऽपि'

अतो माघेनापि प्राचीनावेव वृत्तिन्यासौ स्मृताविति तत्समयस्य पूर्वोक्ते निश्चये न कापि विचिकित्सा । भारवेरर्थतोऽनुकरणं माघकाव्ये प्राप्यत इत्यप्यस्य समयनिश्चयं पूर्वोक्तं समर्थयते ।

**भारवेः परिचयः**

कौशिकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्रो भारविः । भारवेः पूर्वजाः पूर्वम् उत्तरपश्चिमभारतान्तर्गतम् आनन्दपुरं नाम नगरमध्यवात्सुः, परतश्च ते नासिकनामकं दक्षिणभारतनगरमायाताः । एकदा स्वसमसामयिकेन राजकुमारेण विष्णुवर्धनेन समं मृगयायां घोरं काननमुपेतो भारविः मांसं सिषेवे, यत्पापापनोदनाय स तीर्थानि बभ्राम । तदीयं काव्यं श्रुत्वा काञ्चीनृपः सिंहविष्णुस्तमात्मराजधानीमानाययत् । सिंहविष्णुतनयेन राजकुमारमहेन्द्रविक्रमेण सह स तत्र सानन्दसुवास । तस्य पुत्रो मनोरथनामाऽऽसीत् । तस्य प्रपौत्रः दण्डी बभूव । इयं कथाऽवन्तिसुन्दरीकथायां लिखिता । भारवेरेव नामान्तरं दामोदर इत्यथवा दामोदरभारवी भिन्नौ पुरुषाविति सन्देहो दुरपासः ।

भारविः शैव आसीत् । भारविरिति नाम एल्होल् शिलालेखे निम्नलिखितरूपेण प्राप्यते -

'येनायोजि न वेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म ।

स विजयतां रविकीत्तिः कविताश्रितकालिदासभारविकीर्त्तितः ।।'

अयं पुलकेशिनो द्वितीयस्य ६३४ ई० सामयिकः शिलालेखः, अतो भारवि- स्तत्पूर्वतनः सम्भवति । किञ्च काशिकावृत्तौ भारवेः काव्यमुदाहृतं दृश्यते । अपिच स्वहर्षचरिते बाणेन भारविनामास्मरणात् बाणसमयपर्यन्तं न भारवेः प्रसिद्धिरजायतेति तर्कयितुं शक्यते । अतः भारवेः समयः षष्ठेशवीयशतकं मन्तुं युज्यते । शिवार्जुनयुद्धमवलम्ब्य निर्मितं भारवेरेकमेव किरातार्जुनीयाभिधं काव्यं प्राप्यते । अष्टादशसर्गनिबद्धेऽत्र महाकाव्ये महाभारताधारकं सुन्दरमुपाख्यानं चित्रितम् ।

द्यूते पराजितो युधिष्ठिरो भ्रातृभिः पत्न्या च सह द्वैतवने वसति स्म । स दुर्योधनस्य शासनपद्धतिं ज्ञातुमेकं वनेचरं गुप्तचररूपेण प्रेषितवान् । सर्वं ज्ञात्वा प्रतिनिवृत्तो बनेचरो दुर्योधनस्य नीतिपूर्णां शासनपद्धतिं युधिष्ठिराय निवेद्या- मास । भीमद्रौपद्यौ युधिष्ठिरं बह्वुत्तेजयामासतुः परं प्रतिज्ञामुल्लङ्घ्य युधिष्ठिरो युद्धार्थं न प्रावर्त्तत । अत्रान्तरे वेदव्यासस्तत्रायातः । स पाशुपतास्त्रमासादयितु मर्जुनं तपस्यार्थमिन्द्रकीलं नाम पर्वतं प्रेषयामास । तपस्यतोऽर्जुनस्य व्रतभङ्गाय देवबाला आगत्य विफलप्रयासा अभवन् । इन्द्रः स्वयं तदाश्रममागत्य तं प्रोत्साह्यामास । अर्जुनस्य तपोबलं परीक्षितुं शिवः किरातवेषमाधायागतः । मायावी शुकरोऽर्जुनस्थाश्रमपार्श्वेऽदृश्यत ।

**श्रीहर्षः**

श्रीहर्षस्य नैषधीयचरितं नितान्तप्रसिद्धं विशालकायं महाकाव्यम् । श्रीहर्षस्य पिता श्रीहीरस्तथा माता च मामल्लदेवी आस्ताम् । श्रीहीरः काशीवासिनो गढवालवंशोद्भवस्य विजयचन्द्रस्य सभापण्डित आसीत् । शास्त्रार्थे केनापि विदुषा जितः श्रीहीरो मरणसमये स्वजेतारं पण्डितं पराजेतुं स्वसुतं श्रीहर्षं कथितवान् । तदाज्ञावशवर्ती श्रीहर्षो गङ्गातीरे चिन्तामणिमन्त्रजपं कृत्वा विशिष्टां प्रतिभां प्राप । लब्धवैदुष्यश्चासौ विजयचन्द्रस्य सभां प्रविश्य निम्नलिखितं श्लोकं पपाठ-

'गोविन्दनन्दनतया च वपुः श्रिया च मास्मिन्नृपे कुरुत कामधियं तरुण्यः ।
अस्त्रीकरोति जगतां विजये स्मरः स्त्रीरस्त्रीजनः पुनरनेन विधीयते स्त्री ।।'

एतत्कृतीनां कश्मीरेषु महती प्रतिष्ठाऽऽसीत्, प्रसिद्धिरिमं मम्मटभागिनेयं समर्थयति । कान्यकुब्जाधीश्वरस्य जयचन्द्रस्य सभाऽनेनालङ्कृता। तदुक्तमनेनैव - 'ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात् ।' इति । जयचन्द्रपितुर्विजयचन्द्रस्य प्रशंसायां विजयप्रशस्तिनामा ग्रन्थोऽनेन लिखितः ।

जयचन्द्रो गढवालवंश्यो राजाऽऽसीत् । एकादशे द्वादशे चेशवीयशत के अस्य वंशस्योत्तरभारते प्रचुरः प्रभाव आसीत् । विजयचन्द्रजयचन्द्रौ मिलित्वा ११५६ ईशवीतः ११६३ ई० पर्यन्तं राज्यं चक्रतुः । अतो हर्षस्य स्थितिकालो द्वादशशतकोत्तरार्धभागो मन्यते ।

**श्रीहर्षकृतिपरिचयः**

१. स्थैर्यविचारणप्रकरणम्-नामतो दार्शनिकग्रन्थोऽयं प्रायः क्षणभङ्गवाद- खण्डनपरः ।

२.विजयप्रशस्तिः - जयचन्द्रपितुर्विजयचन्द्रस्य प्रशंसापरकं काव्यम् ।

३. खण्डनखण्डखाद्यम् - स्वनामख्यातोऽनिर्वचनीयता सर्वस्वभूतो वेदान्त- ग्रन्थः ।

४. गौडोर्बीशकुलप्रशस्तिः - वङ्गीयस्य कस्यचिद्राज्ञः स्तुतिपरं काव्यम् ।

५.अर्णववर्णनम् - स्वनामख्यातम् ।

६. छिन्दप्रशस्तिः- अज्ञातपरिचयस्य कस्यापि राज्ञो वर्णनपरोऽयं ग्रन्थः स्यात् ।

७ . शिवशक्तिसिद्धिः- शिवशक्त्यो रुपासना ग्रन्थोऽयं सम्भाव्यते ।

८. नवसाहसाङ्कचरितचम्पूः- नाम्नैव विषयः स्वरूपञ्च आख्यायेते ।

अत्र महाकाव्ये निषधशासकस्य नलस्य चरित्रं प्रस्तूयते । अस्मिन् ग्रर्मे द्वाविंशतिः सर्गाः २८३० श्लोकाश्च सन्ति । एतावतापि ग्रन्थेन नलचरितैय देश एव वर्ण्यते (केचित्तु ग्रन्थमिममपूर्णलब्धमाहुः), नलदम्पत्योः परिणयात्र धिवृत्तान्तः वर्णनमय्या पद्धत्या वर्णितोऽत्र ग्रन्थे। राजनि नले दमयन्तीस दमयन्तीचिन्तया दूयमाने स्वारामं पर्यटति सति तेन हंसो गृह्यते दय्या मुच्यते प स एव प्रत्युपकारभावनया नलस्य स्तुतिं दमयन्तीसमीपे करोति । दमयन्त्या पूर्वराग उद्यते। दम्रयन्त्याः पिता विदर्भः स्वयंवरमारचयति । दमयन्तीका मुका देवा अपि तत्रायान्ति, धृतनलस्वरूपाश्चत्वार इन्द्रयमवायुकुवेराः पञ्चम नलश्चेति सर्वेषां समरूपतया दमयन्ती विचित्रां दशां प्रपद्यते। सभावर्णनाय समागता सरस्वत्यपि श्लेषवर्णनया दमयन्तीं व्यामोहयति । अवसाने दमयन्त्याः पातिव्रत्येन दृढानुरागेण

च प्रीता देवाः स्वानि विशिष्टचिह्नानि प्रकटीकुर्वन्ति यैर्नलः परिचितो वृतश्च भवति । जाते पाणिग्रहे कलिप्रवेशो मुखमुद्रणं २ तस्य भवति । नलदमयन्त्योः सुखसङ्गमेन च ग्रन्थः समाप्यते ।

अस्य ग्रन्थस्य सरसा वर्णनपद्धतिः शृङ्गारप्रकर्षपूर्णकथा च सहृदयहृदया न्यावर्जयतः । यथैव श्रीहर्षस्य खण्डनखण्डखाद्यमद्वितीयं तथैव नैषधीयमपि स्वक्षेत्रेऽनुपमम् । या प्रतिभा दर्शनरहस्यानि सरलीकरोति सैव शृङ्गारधारामपि प्रवाहयति । स्वयमुक्तं श्रीहर्षेण - 'साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले तर्के वा मयि संविधातरि समं लीलायते भारती । शय्या वाऽस्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम् ।।'श्रीहर्षो यथैव दार्शनिककविः तथैव योगीति स्वयमुक्तं तेन-' यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम् ।'

**भवभूतिः**

संस्कृतभाषायां नाटकानां प्रणेतृषु प्रधानान्यतमस्य भवभूतेर्वास्तविकं नाम श्रीकण्ठ इत्यासीत् । 'गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ' इति विश्वंश्रवयं विविधागमशास्त्रपारदृश्वाऽऽसीत् । विप्रणयनमूलकमस्य भवभूतिनाम्ना प्रथनं श्रूयते। विदर्भ देशवासी श्रोत्रिय-

हर्षचरिते बाणभट्टः भवभूतेर्नाम कीर्त्तयति, अष्टमशतकोत्पन्नो वामनश्च सदीयमन्यतः स्वग्रन्थे उदाहरणं ददाति । राजशेखरोऽपि भवभूतिं स्वपूर्वभयं प्रख्यापयति- 'स्थितः पुनर्यो भवभूतिरेखया स राजते सम्प्रति राजशेखरः।' इति । राजतरङ्गिण्याम् –

'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ।।'इति निर्दिशन् कल्हणो भवभूतेर्यशोवर्मकालिकतां प्रत्येति, यशोवर्मा च ७३६ मिते श्रीष्टाब्दे म्रियते स्म। एभिः साच्यैर्भवभूतेः समयः सप्तमशतकासनः प्रतिपन्नः ।

अस्य कृतित्रयमधुना प्राप्यते - १. महावीरचरितम् २. उत्तररामचरि तम्, ३. मालतीमाधवञ्च । कृतित्रयमपि रूपकप्रकारान्तर्गतमेव । तत्र प्रथमा कृतिः महावीरचरितमित्यालोचका निश्चयन्ति । यदा महावीरचरितस्य कटूवी आलोचना तत्कालभवैरालोचकैः प्रस्तुता तदाऽयं महाकविस्तान् अबोचत-

'ये नाम केचिदिह नः प्रथयन्त्ययज्ञां जानन्तु ते किमपि तान्यति नैष यनः । उत्पत्स्यते तु मम कोऽपि समानधर्मा कालो डायं निरवधिर्विपुला च पृथ्वी ।।' इति

'यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः।' इति च। अस्य महाकवेः स्वकवित्वे महानादर आसीत्। अयं हि स्वं वाग्देवताया अधिष्ठातारं मन्यते स्म, तदुक्तं तेनैय-'यं ब्रह्माणमियं देवी वाम्पश्येचाऽन्ववत्त्तत ।' करुणरसप्रधानकाव्यनिर्माणे कवेरस्य प्रसिद्धिः। तथा चोक्तम्-

'भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति । पतत्कृत कारुण्वे किमन्यथा रोदिति भावा ।।'

महावीरचरितनाम नाटकं रामायणीयां रावणवधान्तां कथामाश्रित्य विरचितम् । कथ्यते- भवभूतिना कवित्वाभ्यासकाले नाटकमिदं रचितम्। अत्र रामायणकथायां नाटकोपयुक्तं परिपत्त्तनं कृतम् । मालतीमाधवगतं कल्य नासौष्णुवं तथोत्तररामचरितगतो रसपरिपाकश्चात्र यद्यपि नास्ति, तथाप्यत्रत्ये कथानकैक्यं नितान्तरमणीयम् । अत्र राजनीतेर्विवेचनाऽकारणविस्तृता किये तांशेनोद्वेगमिव जनयति ।

**जयदेवः-** गीतगोविन्दं द्वादशसर्गात्मकं खण्डकाव्यम् । यद्यपि सर्वयेदं काव्यकोटी नायाति यतोऽत्र चरितं न वयतेऽथापि वर्णनपरकखण्डकाव्यत्वमस्य स्वीकर्त्तव्यमेव । केचिदाधुनिकास्तु गीतगोविन्दं गीतिनाट्यं मन्यन्ते, बधाह मैक्डोनेल (Macdonel) महोदयः- गीतगोविन्दं शुद्धगीतिकाव्यशुद्धनात्पयोरन्तरे वर्णते, यत्यपीदं द्वादश- शताब्दयों निरमीयत, अथापीदं पकतामुपयास्यतो नाट्यस्योदाहरणस्वरूप- तया प्रथमं निदर्शनं मन्तव्यम्, यदीया परम्परा वने सम्प्रत्यपि जीवति । इदं शुद्धनाट्यस्यानुनामि मन्तुं शक्यते यद्यपि संवादोऽत्र नास्ति ।

गीतगोविन्दस्य द्वादशापि सर्गाः गीतमयाः। सर्गाणां कथां परस्परं योजयितुं फतिचन श्लोका अपि सन्ति । सरसमधुरकवितायाः पराकाष्ठाऽत्र निदर्शिता । भक्तेः सरसकवितायाश्चैकत्र समावेशो यथा गीतगोविन्दे न तथा कापि

परत्रेति कथनं नानुपयुक्तम् । स्वयमुक्तं जयदेवेन- 'यदि हरिस्मरणे सरसं मनो यदि पिलासकलासु कुतूहलम् ।

कतिचन विद्वांसोऽत्र ग्रन्थे- 'गोपीपीन पयोधरमर्दनचञ्चलकर युगशाल इत्यादि शृङ्गारप्रधानपद्यानि दृष्ट्वाऽश्लीलतां वदन्ति । वस्तुतस्तु अत्रप्रये श्रीकृष्णो नाम परमात्मतत्त्वं गोपिकाश्च जीवतस्वानि, तयोर्मिलनमत्र वर्णित मिति परे । केचित् गाः पात्तीति गोपः शरीरन्, गोपी शरीरी आत्मा, पीर पयोधरोऽज्ञानमेघो ज्ञानावरकत्वात्, तस्य मर्दने कर्युगं सालम्बननिरालम्बन समाधिरूपं, प्रकाशक्षमम् तच्छालीत्येवंविधमर्थ कृत्वाऽस्याश्लीलतामनुदन्ति।

वयं तु पश्यामः श्रीकृष्णस्य गोपीभिः सह लौकिक्यः क्रीडा एवं वी वर्णितास्तदात्र कालीलता ? कुमारसम्भवेऽष्टमे सर्गे, माथे एकादशादौ सर्गे नैपचेऽष्टादशेऽन्यत्र च महाकाव्ये तत्र तत्र कामसूत्रमनुसृत्य वर्णिताः सम्भोग प्रकाराः यदि क्षम्यन्ते तदाऽत्रत्यः शृङ्गारः कथं न क्षम्येत । ये पुनः शृङ्गार कथामात्र एवं कमपि विरसं गन्धमनुभवन्ति तेषां कथनमेव किं मूल्यं रक्षति ।

गीतगोविन्दस्य प्रभावो न केवलमुत्तरभारतीयसाहित्येऽपि तु गुर्जरकाडादिदक्षिणप्रान्तसाहित्येऽपि प्रकटमुपलच्यते । चण्डीदासविद्यापतिप्रभृतयस्तु कवयो गीतगोविन्दमुपजीव्यैव विश्ववन्यं पद्मवापुः । महाप्रभुश्चैतन्यदेवोऽस्य गीतगोविन्दस्य परमभक्त आसीत्।

**बोधप्रश्नाः**

1 काव्यस्य लक्षणं किं ?

2 अस्य भेदाः के ?

3 महाकाव्यस्य लक्षणं किं ?

4 पञ्चमहाकाव्यानां नामानि कानि ?

**सन्दर्भग्रन्थः -**

१ भाषाविज्ञानम् एव भाषाशास्त्रम्- डा.कपिलदेवद्विवेदी, विश्वविद्यालयप्रकाशनम्, वाराणसी.

२ An introduction to comparative philology, P.D.Gune

३ भाषाविज्ञानम्, भोलेनाथ तिवारी, १९७३

**सहायकग्रन्थाः –**

1. संस्कृत् वाङ्मय का बृहत् इतिहास्, बलदेव उपाध्यायः,उत्तरप्रदेशसंस्कृतसंस्थानम्।
2. History of classical Sanskrit, M.Krishnamacharyar, Motilal Banarasidas, New Delhi.